॥ ओ३म् ॥

यदीच्छसि वशीकर्तुं
जगदेकेन कर्मणा।
परापवादसस्येभ्यो गां
चरन्तीं निवारय।।

( चाणक्य-नीति )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

प्रस्तावसदृशं वाक्यं
प्रभावसदृशं प्रियम्।
आत्मशक्तिसमं कोपं
यो जानाति स पण्डितः।।

( चाणक्य-नीति )

卐 वर्षम्-७ 卐 अंकः-१८ ( १६० ) 卐 १६ मार्चमासः २०१८ तः ३१ मार्चमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७४ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## तारातरामठमाध्येन भव्यस्वागतमभवत् बाबारामदेव एवं आचार्य महामंडलेश्वर स्वामीअवधेशानन्दगिरी महोदयस्य

बारमेड। बाडमेरस्य तारातरामठस्य पक्षतः आयोजित भव्य शोभायात्रया सह सन्तसमाजस्यापि आयोजनमकरोत्। अस्मिन्नवसरे प्रचसित अन्नदान एवं मन्दिरस्य प्राणप्रतिष्ठायां योगगुरू बाबारामदेव



एवं आचार्य महामंडलेश्वर स्वामीअवधेशानन्दगिरी उपस्थिताः आसन्। बाबारामदेवः प्रतापपुरीनगरस्य प्रशंसा समये उक्तवान यत् सः हरिद्वारतः आशिर्वाद दांतु अगागतवान्। ते उक्तवन्तः यत् तारातरा शक्तेः केन्द्रमस्ति एवं अत्र इदानीं अध्ययन केन्द्रस्य निर्माणं भविष्यति। संतसमागमेनात्पूर्वं योगगुरू बाबारामदेव एवं महामंडलेश्वर स्वामीअवधेशानन्दगिरी महोदयस्य भव्यस्वागतमभवत्। ते मठे स्थिते विभिन्न समाधिनां दर्शनमपि अकुर्वन् एवं पुजामपि अकुर्वन। तारातरायां प्रचल्यमान पञ्चदिवशीय बह्मलीन संत मोहनपुरी महोदस्य अन्नदानमहोत्सवे सम्पूर्ण देशतः विभिन्नमठ एवं सम्प्रदायेन सह सम्बन्धित जनाः उपस्थिताः आसन्।

## संस्कारशिक्षा मानवनिर्मात्री –डॉ श्रेयांश द्विवेदी

वार्ताहरः मुकेशः नौगाँव, छतरपुर मध्यप्रदेश। चैत्र कृष्ण तृतीया संवत् 2074 रविवासरे (04/02/2018) छतरपुर (मध्यप्रदेश)जनपदस्थ नौगाँव उपनगस्थे तक्षशिला वरिष्ठ माध्यमिक विद्यालये होली महोत्सवे समायोजिते सांस्कृतिक समारोहे अध्यक्षाः गीता मनीषी श्रीमान् रमाशंकर मिश्र महोदयाः आसन्। अवसरेस्मिन् मुख्यातिथिः डॉ श्रेयांश द्विवेदी उपाध्यक्षः, संस्कृतभारती एवं हरियाणा संस्कृत अकादमी




पञ्चकूला। सारस्वतातिथिः श्रीमती गीता देवी संस्कृतानुरागिणी आसीत्। अवसरेस्मिन् श्रीमान् मुकेश मिश्रः तक्षशिला संस्थानस् आचार्याः व्यवस्थापिकाश्च अतिथीनां स्वागताभिनन्दनं कृतवन्तः।

अतिथिः स्वीयोद्बोधने प्रोक्तवान् यत् तक्षशिला सदृशःआवासीयविद्यालयाः भारते मानवतायाः संरक्षकाः सन्ति। तेनोक्तं यत् अत्र सर्वे बालकाः संस्कारशीलाः सुयोग्याः सन्ति। वस्तुतः तक्षशिला संस्थायाः सञ्चालकाः भारतं सच्चरित्रः सुशीलं ज्ञानसम्पन्नम् अखण्डं कर्तुं निःस्वार्थभावेन सेवारताः सन्ति। तेनोक्तं यत् योग्यता विषये अत्रत्याः छात्राः IIT, BHU,IIM प्रभृति संस्थानेषु प्रविष्टाः सन्ति। विभिन्नेषु उद्योगेषु, सर्वकारीय सेवासु नियुक्ताः सन्तः संस्कारशीलाः भारतोत्कर्षये कर्तव्यपरायणाः सन्ति। तेनोक्तं यत् अभिभावकाः यदि आत्मनः सन्ततयः सफलं कर्तुं वाञ्छन्ति तर्हि तक्षशिला नौगाँव , छतरपुर मध्यप्रदेशे प्रवेशं कारयन्तु इति ममानुभवः।

## जहाँगीरपुरी-स्थित आर्यसमाजभवनस्य उद्घाटन समारोहः सुसम्पन्नः

नवदेहली। दिल्लीआर्यप्रतिनिधि सभाया अन्तर्गत जहाँगीरपुरी-स्थित आर्यसमाजभवनस्य उद्घाटनं एम.डी.एच.ग्रुप अध्यक्ष महाशयधर्मपालस्य करकमलेनाभवत्। कार्यक्रमस्य शुभारम्भः आचार्य



प्रेमपालशास्त्री माध्यमेन यज्ञेनाभवत् यज्ञोपरान्त तत्रोपस्थित आर्यजनेभ्यः सह निगमपार्षद एवं निर्णयसमिते अध्यक्ष सुरेन्द्रखर्वः ध्वजरोहनेन सह अकरोत्। महाशय धर्मपालः स्व उद्बोधने उक्तवान यत् जीवने दानस्य बहुमहत्वमस्ति। दानस्योल्लेखः वेदेषु अपि अस्ति। अस्मिन्नवसरे सांस्कृतिक कार्यक्रमानां प्रस्तुतिमपि अभवत्। सभाप्रधान धर्मपालआर्य एवं उपप्रधान शिवप्रसादमदानः कार्यकतृन सम्मानितं कृतवान।



नवदेहली। गत दिवसयाम् इंन्दिरागांधीराष्ट्रीयकलाकेन्द्रे 14-16.3.2018 तारिकासु महापंडितराहुलसांकृत्यायनमवलम्ब्य दिवसत्रयव्यापिनो अन्ताराष्ट्रीय संगोष्ठी समायोज्यत। अस्यां संगोष्ठयामाचार्य राधाबल्लभत्रिपाठीना राहुलसांस्कृत्यायनस्य संस्कृत रचना अत्रलब्धि पत्र प्रस्तुतमं



**चित्रे ( वामतो दक्षिणम् ) महापंडितराहुलसांस्कृत्यायनस्य पुत्रः श्री जेता श्रीमती जया आचार्य राधाबल्लभत्रिपाठी, प्रो. उपेन्द्ररावः, ( सत्राध्यक्ष डॉ.रमाकान्त शुक्लश्च ( 14.03.2018 )**

# संस्कृत विद्यालयस्य छात्रेभ्यः क्रीडायाः समारोहः

नवदेहली। दिल्लीसंस्कृतअकादमी एवं डॉ. गि.ला.शा. प्राच्यविद्या प्रतिष्ठानस्य संयुक्त तत्वावधाने श्रीवेदव्याससंस्कृतविद्यापीठ, वक्करवासा, नवदेहल्यां दिल्ली स्थित अनेन संस्कृतछात्रेषु क्रीडा प्रति उत्साहस्य वातावरणं भविष्यन्ति। अस्मिन्नवसरे अकादम्याः सचिव जीतरामभट्टः उक्तवान यत् संस्कृत छात्राणां सर्वांगीन विकासाय अकादमी प्रयत्नशीलोऽस्ति।



विभिन्न संस्कृत विद्यालयानां छात्रेभ्यः द्वि दिवसीय क्रीड़ा प्रतियोगितायाः आयोजनमभवत्। प्रतियोगितायाः शुभारम्भः अकादम्याः उपाध्यक्षा डॉ. कान्ताभाटिया माध्यमेन अभवत्। डॉ. भाटिया उक्तवती यत् संस्कृतस्य छात्राणां मानसिक विकासाय प्रथमेव अस्याः प्रतियोगितायाः आयोजनं भवति। श्रीवेदव्यास संस्कृतविद्यापीठस्य प्रबन्धक श्रीकटारिया उक्तवान् यत् समये-समये संस्कृत छात्राणां मानसिक एवं शारीरिक विकासाय अस्य प्रकारस्य क्रीड़ा प्रतियोगिताः आयोजनं भवितव्या। अस्मिन्नवसरे अनेके गणमान्यजनाः उपस्थिताः आसन्।

# मानवतायाः प्रेरणा प्रददाति संस्कृते निहित ज्ञानम्-मुक्ति सान्याल

नवदेहली। संस्कृत भाषा प्रत्येक समाज वर्ग व परिवारस्यआवश्यकताऽस्ति। संस्कृत साहित्ये निहित ज्ञानं आदिकालादेव विश्वं प्रेरयति। संस्कृतस्य महत् ज्ञानेन् व्यक्ति बहुषु राज्येषु संस्कृतसम्भाषणशिविरस्य आयोजनं कुर्वन्ति। भारतीयमहाविद्यालयस्य संस्कृतविभागीयाचार्य डॉ. आशातिवारी उक्तवती यत् संस्कृतसाहित्ये जीवनमूल्यानां विषये विस्तृत रूपेण



आदर्श, सुसंस्कारी एवं प्रतिभावान भवितुं शक्यते। विचारोऽयं भारतीमहिलामहाविद्यालयस्य प्राचार्या डॉ. मुक्तिसन्यालः डॉ गो. गि.ला. शास्त्री प्राच्य विद्याप्रतिष्ठान माध्यमेन आयोजित दश दिवसीय संस्कृतसम्भाषण शिविरस्य शुभारम्भ समये व्यक्तवती।

अस्मिन्नवसरे स्वीडनस्य संस्कृत प्रचारिका आनन्दाहिमानी उक्तवती यत् संस्कृतसम्भाषणशिविरस्य माध्यमेन संस्कृतं अधिकाधिक जनानां मध्ये प्रसारयितुं शक्यते। ताः स्वयं भारतस्य वर्णनमस्ति। अस्मिन भौतिकवादी युगे युवा वर्ग संस्कृत एवं भारतीय संस्कृत्या विलगो भवति। अस्य प्रकारस्य शिविरस्य आयोजनं एषु सहायको भवितुं शक्यते। कार्यक्रमस्य अध्यक्षता समये डॉ. कान्ताभाटिया उक्तवती यत् संस्कृतं प्रति जनान् प्रेरयितुं अग्रे आगन्तव्यम्। येषु जनेषु संस्कृत अधिगमनस्य जिज्ञासा अस्ति तस्य कृते एतत् सम्भाषण शिविरः सहायको भवितुं शक्यते। अस्मिन्नवसरे अनेके गणमान्यजनाः एवं संस्कृतानुरागी उपस्थिताः आसन्।

# शिक्षा ज्ञानार्जनाय भवेत्-डॉ श्रेयांश द्विवेदी

मोरनी-हरियाणा। चैत्र कृष्ण द्वादश्यां संवत् 2074 बुधवासरे (14/03/2018) मोरनीस्थ राजकीय प्राथमिक अध्यापक प्रशिक्षण संस्थाने हरियाणा संस्कृत अकादमी पञ्चकूला 'नगरे नगरे भगवद्गीता, जने जने संस्कारः' इति कार्यक्रमम् आयोजितवती। अस्मिन्नवसरे



प्राचार्या श्रीमती अनीता चौधरी, श्री विष्णु दत्त , श्री सुभाष चन्द्र, श्री प्रवीण कुमार प्रभृतयः 250 छात्राध्यापकाः छात्राध्यापिकाश्च सोत्साहं भागं गृहीतवन्तः। अस्मिन्नवसरे मुख्यरूपेण उद्बोधनं डॉ श्रेयांश द्विवेदी (उपाध्यक्ष हरियाणा संस्कृत अकादमी एवं संस्कृति भारतीय हरियाणा) महोदयानाम् अभवत्। तेनोक्तं यत् शिक्षा केवलं प्रमाणपत्र प्राप्तये धनार्जनाय न अपितु ज्ञानार्जनाय वर्तते। तेनोक्तं श्रीमद्भगवद्गीता सर्वोपकारकारं कर्तुं क्षमः भवन्तः प्रतिदिन गीताभ्यासं कुर्वन्तु। कार्यक्रमे अकादमी पक्षतः श्रीमद्भगवद्गीता ग्रन्थवितरणं कृतम्।

# नगरे नगरे भगवद्गीता जने जने संस्कारः

वार्ताहरः रजनीशः मऊरानीपुर, झाँसी, उत्तरप्रदेशः। चैत्र कृष्ण चतुर्थ्यां संवत् 2074 सोमवासरे (05/03/2018) सरस्वती विद्या मन्दिर इण्टर कॉलेज मऊरानीपुर नगरे हरियाणा संस्कृत अकादमी 'नगरे नगरे भगवद्गीता



जने जने संस्कारः' इति कार्यक्रमं समायोजितवती। तत्र श्रीमान् राजकुमार महोदयः जिला प्रचारकः, श्रीमान् विनोद सहगल प्रबन्धक एवं जिला उपाध्यक्ष भाजपा, श्रीमती गीता देवी, कार्यकर्त्री ,संस्कृतभारती दिल्ली श्रीमान् राजेन्द्र कुमारः, श्रीमान् शिवपाल विश्वकर्मा प्राचार्यःसंस्थानस्य आचार्याश्च भागं गृहीतवन्तः। कार्यक्रमे मुख्यातिथिः डॉ श्रेयांश द्विवेदी उपाध्यक्षः संस्कृतभारती एवं हरियाणा संस्कृत अकादमी सर्वैः सह गीताया उपयोगिता इति विषये चर्चां कृतवान्। अन्ते च सर्वेभ्यः श्रीमद्भगवद्गीता ग्रन्थं प्रदत्तवान्।


ओ३म्

भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण (द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)

सत्य के प्रचारार्थ

**सत्यार्थ प्रकाश**

सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन

कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें

आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com



खादी वस्त्र ही नहीं, विचार है !

आदर्श ग्रामोद्योग समिति, दिल्ली

**खादी वस्त्रों का विशाल भण्डार**

✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल (रेडीमेड) ✪ रेशम साड़ी (प्रिन्ट) ✪ रेशम स्पन व रेडीमेड ✪ पोली खादी

सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद ,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।

**खादी ग्रामोद्योग भवन**

✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोनः-0120-2631855, 9899334204



**Girish Kumar Bansal, Manager**

**Vidya Deep Public School**

(Govt. Recognised)

C-400/A, Main Market
Bhajan Pura, Delhi-110053

Mob.: +91-9555955591
+91-9810067099,+011-22563764

# संस्कृतेन संस्कारः संस्कारेण समाजविकासः -डॉ द्विवेदी

वार्ताहरः रजनीशः खँदरका , मऊरानीपुर, झाँसी उत्तरप्रदेशः। चैत्र कृष्ण द्वितीया संवत् 2074 शनिवासरः (03/03/2018) झाँसी जनपदस्य मऊरानीपुर उपनगरे ग्रामे ग्रामे संस्कृतम् इति कार्यक्रमे जिला प्रचारकः श्रीमान् राजकुमार महोदयः, नगरसंघ चालकः श्रीमान् बलराम पाठकः, सदस्य सम्पर्क टोली श्रीमान् सुरेश नायकः, श्रीमान् राजेन्द्र कुमार शारीरिक प्रमुख श्रीमान् रमाकांत दुबे BDC, कौशल मुखिया, रजनीशः रामकिशोरः, प्रतापः, राजू, भरोसे, खुमान,अखिलेश कुमारः, देवेन्द्रः, विमलेशः, मथुरा, पन्नालालः,जागेश्वरः प्रभृतयःशताधिकं जनाः आचार्य सन्तोष चन्द्र महोदयानां संयोजने भागं गृहीतवन्तः। अस्मिन् कार्यक्रमे अभ्यागतरूपेण श्रीमान् राजकुमारः, जिला प्रचारकः झाँसी, श्रीमान् बलरामः नगरसंघचालकः मऊरानीपुरम्, विशेषतः डॉ श्रेयांश द्विवेदी उपाध्यक्ष हरियाणा संस्कृत अकादमी एवं संस्कृतभारती, हरियाणा आसीत। कार्यक्रमे डॉ द्विवेदी प्रोक्तवान् यत् यावत् समाजे ग्रामेषु संस्कृतमयं वातावरणं न भविष्यति तावत्पर्यन्तं प्रतिगृहं संस्काराः कथमपि न स्थास्यन्ति। तेन विना समाजः विकासपथं कथमपि गन्तुमसमर्थः। अतः संस्कृतभारती समग्रमपि राष्ट्रं संस्कृतमयं कर्तुं प्रयतते। तेनोक्तं यत् शिक्षामूल्यपरा भवेदिति विचारः सामाजिकेषु यदा आगमिष्यति तदैव शिक्षामूल्यपरा भविष्यति । साम्प्रतम् सामाजिकानां शिक्षा विषये चिन्तनमस्ति यत् शिक्षा केवलम् अर्थोपार्जनाय इति चिन्तनं शिक्षां मूल्यविरहितां करोति।

# रामजसमहाविद्यालये हरिदत्तशर्मणः व्याख्यानम्

दिल्लीविश्वविद्यालयस्य रामजसमहाविद्यालये मार्चमासस्य पञ्चदष्ठादिनाङ्के " आधुनिकसंस्कृतसाहित्य : विविध आयाम " इति विषयमधिकृत्य 'प्रो० हरिदत्तशर्मा' प्रख्यात् कविः





पूर्वविभागाध्यक्षः च , इलाहाबादविश्वविद्यालयः, इलाहाबाद व्याख्यानं अददात्। प्रायोजिते कार्यक्रमे दिल्लीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षा प्रो० शारदा शर्म महोदया अध्यक्षपदमलंकृतवत्याः। रामजसमहाविद्यालस्य वरिष्ठप्राध्यापकः ' डॉ० पी० के० पाण्डा' महोदयेन कार्यक्रमस्यारम्भे स्वीयमुद्बोधनं प्रत्तः। कार्यक्रमस्य सञ्चालनं रामजसमहाविद्यालयस्य विभागाध्यक्ष डॉ० राजमङ्गलयादवः अकरोत्। कार्यक्रमेऽस्मिन् अनेकाः छात्राः प्राध्यापकाः च उपस्थिताः।

# एकदिवसीया-संस्कृत-कार्यशाला

वार्ताहरः गौरीशः गुरुग्राम हरियाणा। अद्य चैत्र कृष्ण षष्ठ्यां संवत् 2018 बुधवासरे (09-03-2018) सरलमानक संस्कृतम्-एकदिवसीया कार्यशालायाः आयोजनं गुरुग्रामस्थ द्रोणाचार्य महाविद्यालये अभवत ।अस्याः कार्यशालायाः आयोजनं



हरियाणा संस्कृत अकादमी पञ्चकूला ONGC-CSR-SPF परियोजनायाः संयुक्ततत्वाधाने कृतवती।

अस्मिन् कार्यक्रमे मुख्यातिथिःडॉ श्रेयांश द्विवेदी उपाध्यक्ष,हरियाणा संस्कृत अकादमी ।

कार्यशालायां चत्वारि सत्राणि आसन्।

प्रथमसत्रे किमर्थं सरलमानकसंस्कृतम् ? इति विषये मुख्यवक्ता आसीत् डा. श्रेयांश द्विवेदी ।

द्वितीयसत्रे सरलमानकसंस्कृतस्य स्वरूपम् इति विषये वक्ता डॉ जगदम्बे वर्मा आसीत् । तृतीयसत्रे प्रौढसंस्कृतस्य



सरलमानकसंस्कृतेनपरिवर्तनाभ्यासः इति विषये वक्ता गौरीशः,परास्नातकश्छात्र,देहलीविश्वविद्यालयः आसीत्। चतुर्थसत्रे सर्वमान्य कसंस्कृतस्य क्रियान्वयनम् इति विषये वक्ता रूपेण डॉ मीनाक्षी पाण्डेयआसीत् । अस्मिन् अवसरे अनेकाः संस्कृतानुरागिणःशोधकर्तारश्छात्राः सोत्साहं भागं गृहीतवन्तः ।

# विक्रमसम्वत् विरोधकृत् (विरोधी) २०७५

## नूतनसंवत्सराभिनन्दनम्

(मालिनी)

इषुमुनिखयमाब्दो वैक्रमोऽयं विरोधी
खलदलदलनायाराध्यते विप्रवर्यैः।
प्रतिपदि रविवारे चैत्रमासे पुनीते
सुविदितसितपक्षे स्वागतं तस्य भूयात्॥१॥
वितरतु शुभयोगं मीनगश्चन्द्रदेवः
दिनकरझषराशौ संस्थितश्चापि नित्यम्।
प्रवहतु रसधारा सर्वसौख्येन युक्ता
प्रतिपलमिह भूमौ कामयेऽहं सदैव॥२॥

(पञ्चचामर)

विरोधिकृन्नवागते तु विक्रमस्य वत्सरे
पराजिता भवन्तु शीघ्रमेव सर्वशत्रवः।
भवत्वखण्डभारतस्य कल्पना प्रतिष्ठिता
समस्तविश्वमण्डले चिरात्प्रतीक्षिता जनैः॥३॥
विजित्य सर्वसम्पदं तथा निजात्मगौरवम्
अतीतमानसंयुतं चतुर्षु दिक्षु रक्षितम्।
विदार्य शत्रुमण्डलं वरे पदे विभूषितं
गुरुत्वसाधनेन नोऽस्तु भारतं सुसंस्कृतम्॥४॥

प्रस्तुतिकर्त्ता-
**डॉ.सुन्दरनारायणझाः**
सहायकाचार्यो वेदविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली-16

# हरियाणा सर्वकारस्य कार्याणि नितराम् अभिनन्दनीयानि- डॉ द्विवेदी

वार्ताहरः आर के पूनिया गुरुग्रामः हरियाणा। चैत्र कृष्ण त्रयोदश्यां संवत् 2074 गुरुवासरे (15/03/2018) गुरुग्रामस्थ जिला शिक्षा



प्रशिक्षण संस्थाने हरियाणा संस्कृत अकादमी 'नगरे नगरे भगवद्गीता, जने जने संस्कारः' इति शृंखलान्तर्गतं कार्यक्रमस्य योजना विषये उपवेशनम् अभवत्। तत्र अध्यक्षतां डॉ श्रेयांश द्विवेदी उपाध्यक्ष हरियाणा संस्कृत अकादमी पञ्चकूला एवं प्रान्त उपाध्यः संस्सृतभारती हरियाणा निर्व्यूढवान्। कार्यक्रमस्यान्ते डॉ द्विवेदी महोदयेन प्रोक्तं यत् हरियाणा सर्वकारः गुरुकुलानां संरक्षणं वाञ्छति। यतोहि गुरुकुल शिक्षा पद्धतिः संस्काराणां संरक्षिका। तेन हरियाणा विधानसभायां महर्षि वाल्मीकि संस्कृत विश्वविद्यालयस्य विल शिक्षामन्त्री प्रस्तुतवान् इति सूचना दत्ता। तेन हरियाणा सर्वकारः धन्यवादार्हा इति उक्तम्। उपाध्यक्ष महोदयेन माननीय मुख्यमंत्री महोदयानां हार्दिकम् अभिनन्दनं प्रकटितम् । अस्मिन्नवसरे गुरुग्रामस्थ जिला शिक्षा प्रशिक्षण संस्थानस्य सर्वे शिक्षाधिकारिणः डॉ श्रेयांश द्विवेदी (उपाध्यक्ष हरियाणा संस्कृत अकादमी) महोदयानाम् उपस्थितौ प्रसन्नतां प्रकटितवन्तः। सर्वैं सर्वकारस्य निष्पक्ष कार्यपद्धतेः प्रशंसाकृता। अस्मिन्नवसरे श्रीमती प्रीतिः, श्रीमती दीपावली बुधवार, श्री राकेश श्योरान, श्री आर के पूनिया प्रभृतयः विद्वांसः आसन्।



मुख्यमंत्री श्रीशिवराजसिंहचौहानः एवं केन्द्रीयपरिवहनराज्यमार्गमंत्री श्री नितिनगडकरी होशंगाबाद मंडलस्य बांद्राभाने पञ्चमनदी महोत्सवे नर्मदानद्यां केन्द्रित स्मारिकायाः विमोचनमकुरुताम्




मुख्यमंत्री श्रीशिवराजसिंहचौहानः, वरिष्ठपत्रकार श्रीदीपकचौरसिया माध्यमेन प्रकाशित पुस्तक ''कूड़ा धन'' इत्यस्य लोकार्पणमभवत्।

# सम्पादकीयम्

सुरभारतीप्रणयिनः! सुमतयो विद्वांसः!
नववर्षस्य कोटिशः शुभकामनाः।

अमृतपानकुशलाः कोविदाः! समग्रेऽपि भूमण्डले याः संस्कृतयो विलसन्ति, तासु अस्माकं भारतीया संस्कृतिरेव सर्वश्रेष्ठेति समुद्घोषितं बहु पूर्वमेव विज्ञैरिति को नो विजानाति। अस्याः कारणमस्ति सर्वविदितम्।

सुजनाः! सृष्टेरारम्भः चैत्रशुक्लप्रतिपत्तिथौ अभूदिति भारतीया संस्कृतिः भाषते। सत्यमेव यदा प्रकृतेः प्रतिकणं प्रफुल्लं भवति, वृक्षाः मुदिता उपवनेषु विलसन्ति, उद्यानेषु अगणितप्रकारकाणि कुसुमानि सरागाणि भ्रमरकुलानि समाकर्षन्ति, रसाले मंजरी नवोढावगुण्ठनमिव काकलवधूमनश्चोरयति, यतः प्रमत्ता सा कूकूध्वनिभिः संसारं विमोहयति, तदैव नववर्षसमागमो मन्यते भारतीयः। क्वचित् मधुमासमत्तो भ्रमरो भ्रमरीं स्वरागेण शीघ्रमुद्यानमुपागच्छेति यदा ब्रूते तदा नवसंवत्सरो भारतीयानां चेतांसि समाहरति। यदा प्रातर्विहगाः मधुररवैः मसृणविष्टरे शयानान् कामिनीपाशबद्धान् शिथिलयति, यदा च जागरितो महाकविः स्वलेखनीतूलिकया मनोहारि काव्यं रचयितुं संलग्नो भवति, किंच सर्वत्र दर्शनीया नवीनतां मानवानां मानसमनायासं समाकर्षति, शरीरे काचित् स्फुरणा स्वमेव समनुभूयते तदैव नवसंवत्सर आगत इति वेत्ति भारतीयो जनः। सौभाग्यवन्तो वयं यत्र नवसंवत्सरस्वागतं भारतीया संस्कृतिः सहर्षं गष्ह्मागतम् अतिथिं मान्यमाना सामोदं सद्भावनया कुर्वती मुदमादधाति।

सुधियः! सम्प्रति वयं निजसंस्कृतिपरिपालकाः अतीव सक्रियाः, प्रतिवर्षमिव अस्मिन् वर्षे नवसंवत्सरस्वागतं सर्वैरपि भारतीयैः विविधप्रकारेण विहितमिति दृष्टमेवास्माभिर्मवद्भिरिति सप्रणयं वदामि।

किंच अरविन्दतिवारीकवेः पद्यमर्पयामि–

मन्त्री हन्त शनिर्नृपश्च मिहिरो नैवानयोर्मित्रता
भाषन्ते गणकाः निशम्य तु मनो नः कम्पते बन्धवः!
द्रष्टव्या सुखदे विरोधकर्षति हा संवत्सरे चोन्नतिः
भूयान्नन्दतु भारतीयजनता नित्यं समीहामहे।।

अन्तेऽहं संस्कृतसंवादपरिवारपक्षतः भवद्भ्यो भवतीभ्यः बाणाश्वाकाशक्षिमितो विरोधकष्त् नवसंवत्सरो नितरां मंगलकारको भूयादिति कामयमाना अमरवाणी विजयतां समुद्घोषयामि।

## वेदामृतम्

**(ऋग्वेदभाष्यम्)**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**गायन्ति त्वा गायत्रिणोऽचेन्त्यर्कमर्किणः।**
**ब्रह्माणस्त्वा शतक्रतु उद्वंशमिव येमिरे॥१॥**

अर्थ-इस मन्त्र में उपमालङ्कार है। जैसे सब मनुष्यों को परमेश्वर ही की पूजा करनी चाहिए, अर्थात् उसकी आज्ञा के अनुकूल वेदविद्या को पढ़कर अच्छेअच्छे गुणों के साथ अपने और अन्यों के वंश को भी पुरुषार्थी करते हैं, वैसे ही अपने-आप को भी होना चाहिए और जो परमेश्वर के सिवाय दूसरे का पूजन करनेवाला पुरुष है, वह कभी उत्तम फल को प्राप्त होने योग्य नहीं हो सकता, क्योंकि न तो ईश्वर की ऐसी आज्ञा ही है। और न ईश्वर के समान कोई दूसरा पदार्थ है कि जिसका उसके स्थान में पूजन किया जावे। इससे सब मनुष्यों को उचित है कि परमेश्वर ही का गान और पूजन करें। ।।१।।

फिर भी ईश्वर को कैसे जानें, सो अगले मन्त्र में प्रकाश किये है–

**यत्सानोः सानुमारुहद् भूर्यस्पष्ट कवम्॥**
**तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥२॥**

अर्थ-इस मन्त्र में भी श्इवश शब्द की अनुवृत्ति से उपमालङ्कार समझना चाहिए। जैसे सूर्य अपने सम्मुख के पदार्थों को वायु के साथ बारम्बार क्रम से अच्छी प्रकार आक्रमण, आकर्षण और प्रकाश करके सब पृथिवीलोकों को घुमाता है, वैसे ही जो मनुष्य विद्या से करने योग्य अनेक कर्मों को सिद्ध करने के लिए प्रवृत्त होता है, वही अनेक क्रियाओं से सब कार्यों के करने को समर्थ हो सकता तथा ईश्वर की सृष्टि में अनेक सुखों को प्राप्त होता और उसी मनुष्य को ईश्वर भी अपनी कृपा दृष्टि से देखता है, आलसी को नहीं ।।२।।

# विष्णुपुराणे सृष्टिविज्ञानम्

डॉ0 रामचन्द्रः'

पुराणवाङ्मये विष्णुपुराणस्य महत्त्वमपूर्वमिति नाविदितं विपश्चिदपश्चिमानाम्। विष्णुपुराणे च यादृक् सृष्टिप्रक्रियावर्णनं समुपलभ्यते तत् सर्ववाङ्मयमूर्धानमतिशेते। विष्णुपुराणान्तर्गत-सृष्टिप्रक्रियायाः । कंचन विशेषा अस्मिन् शोधलेखे-

**प्रस्तूयन्तेसष्ट्युत्पत्तिसन्दर्भ प्रश्नाः**

विष्णुपुराणस्य आरम्भ एव सृष्टिप्रक्रियान्तर्गतरहस्योद्घाटनाय समर्पितः। तथा च प्रथमांशस्य पथमाध्याये मुनिवरमैत्रेयेण पराशरो महामुनिः प्रणिपातपुरस्सरं पृष्टः। तत्र प्रथम एव प्रश्न इदं रहस्यं जिज्ञासितवान् यत् इदं जगत् कथमुत्पन्नमभवद् भविष्यति च पुनरुत्पत्तिरस्य कथं भविष्यति?[1] अग्रे च जगदुपादानरहस्यान्वीक्षया प्रश्न एष समुदाहारि-

**यन्मयं च जगद्ब्रह्मन्यतश्चैतच्चराचरम्।**
**लीनमासीद्यथा यत्र लयमेष्यति यत्र च॥**
**यत्प्रमाणानि भूतानि देवादीनां च सम्भवम्।**
**समुद्रपर्वतानां च संस्थानं च यथा भुवः॥**
**सूर्यादीनां च संस्थानं प्रमाणं मुनिसत्तम।**
**देवादीनां तथा वंशान्मनून्मन्वन्तराणि च॥**[2]

वस्तुतः मैत्रेयेण ये प्रश्नाः समुद्भाविताः पराशरेण च उत्तरिताः तन्माध्यमेन सर्गप्रक्रियाविज्ञानस्य सर्वमपि रहस्यजातं नूनं समाहितं भवति।

अत्र वसिष्ठानुकम्पासमधिगतपुराणसंहिताविज्ञानेन पराशरेणाभिहितं यत् जगदिदं विष्णोः समुद्भूतं तत्रैव स्थितं प्रलयवेलायाञ्च तस्मिन्नेव लयमेष्यति -

विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम्।
स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः।[3]

विष्णुस्वरूपविचारणा

विष्णुश्च खलु अविकारः, सर्वजिष्णुः, हिरण्यगर्भः, स्थूलसूक्ष्मात्मा, सर्गस्थितिविनाशानां जगतो जगन्मयः, मुक्तिहेतुभूतश्च वर्तते[4]। स च प्रधानपुरुषकालानां परमे पदे स्थितः। तञ्च केवलं सूर्य एवं द्रष्टुं प्रभवन्ति नान्ये[5]। विष्णोश्च भगवतो या इयं व्यक्ताव्यक्तपुरुषकालरूपिणी स्थितिः सा की लालस्य चेष्टा इव निशामयितव्या[6]। अव्यक्तकारणं संसदात्मकम् अक्षय्यम , अजरम्, अमरम्, त्रिगुणय, जगद्योनिः, अनादिप्रभवाप्यय शब्दस्पर्शविहीनं च वर्तते[7]।

विष्णोः स्वरूपाच्च प्रधानपुरुषेत्याख्ये द्वे रूपे संजाते, ततश्च यया शक्त्या ते धृते वियुक्ते च भवतः कालशक्तिरित्यभिधीयते[8]। गुणसाम्ये समुपागते पुंसि च पार्थक्ये भावे संस्थिते कालस्वरूप परिवर्तते[9]। प्राप्ते च सन्निहिते काले पुनः सर्गारम्भावसरे हरिः खलु व्यायाव्ययात्मको प्रधानपुरुषात्मकौ आत्मेच्छया क्षोभयति। परमेश्वरश्च तथा एतयोः क्षोभप्रवृत्तिजनको यथा गन्धः सन्निधिमात्रेण मनसः क्षोभाय प्रकल्पते नोपकर्तृरूपेण[10]।

प्रलयकाले च सर्गस्य स्थितिः यादृशी आसीत् साऽपि निरूपिताऽत्र। प्रधानप्रतिपादिका वैशिष्ट्यपरिपरि स्थितिदृष्टिरियं वेदवावेत्तृभिः ब्रह्मवादिभिरेवं प्रकटिता

**नाहो न रात्रिर्न नभो न भूमिर्नासीत् तमोज्योतिरभूच्च नान्यत्।**
**श्रोत्रादिबुद्ध्यानुपलभ्यमेकम्, प्राधानिक ब्रह्म पुमांस्तदासीत्।**[11]

वस्तुतो वर्णनमेतत् श्रुतिपरम्परामनुकरोति। नासदीयसूक्ते परमेष्ठिना तथैवाभिहितम्। तथा चर्ग्वेदे वर्णितमेतत्

**नासदासीन्नो सदासीत् तदानीं नासीद् रजो नो व्योम परो यत्।**
**किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्।**[12]

अग्रे च प्रजापतिर्वर्णयति यत् प्रलयवेलायाम् अहोरात्रस्य मृत्योश्च लवोऽपि नावर्तत। केवलमेल तद् अवातं स्वधयाऽऽनीत्

**मृत्युरासीदमृतं न तर्हि**
**न रात्र्या अह्न आसीत् प्रकेतः।**
**आनीदवातं, स्वधया तदेक**
**तस्माद्धान्यन्न परः किंचनास॥13**

**जगत्सर्जना**

सर्गकाले सम्प्राप्त इदम्प्रथमतया सत्त्वरजस्तमसा साम्यावस्थायां सत्यां तस्याश्च विष्णोः क्षेत्रज्ञरूपेण अधिष्ठितायाः गुणव्यञ्जनसम्भूतिः प्रवर्तते।[14] समुत्पन्नं च तत् महत्तत्त्वं प्रधानतत्त्वं समावृणोत्। स च । महान् सात्त्विकराजस-तामसरूपेण त्रिधा सञ्जायते।[15] यथा च खलु बीजं त्वचा आवृतं भवति तथैव महान् खलु प्रधानतत्त्वेन आवृतमिव भवति। इदं च महत्तत्त्वं त्रिविधगुणाभिन्नं भवति तस्मात् ततो विजायमाना सर्गरचनाऽपि त्रिविधैव प्रवर्तते-सात्त्विकी, राजसी, तामसी चेति महतश्च वैकारिकः (सात्त्विकः), तैजसः (राजसः) तामसश्च भूतादिरूपः त्रिविधोऽयमहङ्कारो दृष्टिपथमवतरति।[16] अहङ्कारश्च भूतेन्द्रियाणां हेतुभूतः। स च महता तथैव समावृतः यथा प्रधानेन महान्।[17] भूतादिः (तामसः) अहङ्का विकुर्वणः शब्दतन्मात्रजनकः ततश्च शब्दलक्षण आकाशः समुत्पन्नः। शब्दमात्रं चाकाश भूतादिः समावृणोत् एवञ्चोत्तरोत्तरं आकाशाद्वायुः, वायोश्च ज्योतिः, ज्योतिषश्च रसम्, रचाच्च पृथिव्युत्पत्तिर्भवति।[18] एतच्च भूतपञ्चकं शब्दस्पर्शरूपरसगन्धेत्याख्यगुणमात्राभिन्नमिति तन्मात्रमभिख्यातम्-

तस्मिंस्तस्मिंस्तु तन्मात्रं तेन तन्मात्रता स्मृता।
तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते।।[19]

तन्मात्राश्च शान्ताः, मूढाः, घोरा वा न भवन्ति। एवमत्र भूततन्मात्रसगत्पत्तिराख्याता।[20]

दशेन्द्रियाणि तैजसानि राजसाहङ्कारसमुद्भूतानि भवन्ति। तेषां येऽधिष्ठातृभूता देवाः मनश्च वैकारिकाः सात्त्विकाऽहङ्काप्रादुर्भूताः सन्ति। त एते च आहत्य एकादश भवन्ति। त्वक्चक्षुर्नासिका जिह्वा श्रोत्राभिधानि बुद्धियुक्तानि शब्दादीनामवाप्त्यर्थं पञ्च ज्ञानेन्द्रियाणि। अपराणि तु विसर्गशिल्पगत्युक्तिकर्मपराणि पञ्च कर्मेन्द्रियाणि समभिधीयन्ते। आकाशवायुतेजस्सलिलरूपाणि च भूतानि शान्तघोरमूढवृत्त्यावृतानि विशेषाणि भवन्ति।[21] शान्तघोरमूढाः सुखदुःखमोहयुक्ता इत्यनर्थान्तरम्।

**अण्डोत्पत्तिः तन्माहात्म्यञ्च**

आकाशादयः पञ्च विशेषा भवन्ति। त एते च नानावीर्याः पृथग्भूता मिथः संहतिं विना समागम्य प्रजाः स्रष्टुं नाशक्नुवन्। ततो मिथः समाश्रिताः अन्योऽन्यसंयोगं समवाप्त एकसङ्घातलक्ष्याः पकतैक्यं समासाद्य पुरुषाधिष्ठानेन प्रधानानुग्रहेण च महदाद्याः विशेषान्ता अण्डमुत्पादयन्ति।[22] तच्चाण्डे भतेभ्यो विवृद्धं सत् जलबुद्बुद्वत्सम जलेशयं बृहद् च ब्रह्मरूपस्य विष्णोः प्राकृतं परमं स्थानं समजायत।[23] तस्मिंश्चाण्डे अव्यक्तरूपोऽयं विष्णुः जगत्पतिः व्यक्तरूपो भूत्वा हिरण्यगर्भरूपेण संस्थितः। तस्य च हिरण्यगर्भस्य मेरुरुल्बमभूत्। महीधराश्च जरायुरूपेण, समुद्राश्च गर्भोदकरूपेणावर्तन्त। तस्मिन्नेवाण्डे सपर्वतद्वीपाः समुद्राः, सनक्षत्रो लोकसंग्रहः, देवाः असुराः मनुष्याश्च आविर्भूताः। तच्चाण्डं तामसाहङ्कारेण, स च महता, महांश्च प्रधानेनावृत्त आसीत्।[24] एवञ्चाण्डमिदं सर्वैरपि एवंविधैः प्राकृतैः सप्तावरणैस्तथैव आवृतं यथा नारिकेलस्यान्तर्बीजं बाह्यदलैरावृतं भवति–

**एभिरावरणैरण्डं सप्तभिः प्राकृतैर्वृतम्।**
**नारिकेलफलस्यान्तर्बीजं बाह्यदलैरिव॥**[25]

अण्डे चास्मिन् स्थितो विश्वेश्वरो हरिः (विष्णुः) रजोगुणं जुषन् ब्रह्मा भूत्वा जगतः सर्गाय प्रवर्तते। अनन्तपराक्रमो विष्णुश्च सत्त्वभृद्भूत्वा आकल्पान्तं सृष्टिमनुयुगं पाति। कल्पान्ते च तमोद्रेकी स एव विष्णु रूद्ररूपी अतिदारुणोऽखिलभूतानि भक्षयतीति रहस्यमत्र प्रत्यपादि।[26] वस्तुतस्तु स विष्णुरेव सृज्यः, सर्गकर्ता, पाति, अत्ति, पालयते च–

**स एव सृज्यः स च सर्गकर्ता, स एव पात्यत्ति पाल्यते च॥**
**ब्रह्माद्यवस्थाभिरशेषमूर्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः॥**[27]

**विद्यादिसर्गवर्णनम्**

सर्गादौ विभुः देवादीनखिलान् ससर्ज। तस्य च विभोः ब्रह्मणः सृष्टिं चिन्तयतः प्राथमिकोऽबुद्धिपूर्वकः तमामयः सर्गः प्रादुर्भूतः। तत्र च तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्र इत्येवंरूपा पञ्चपर्वाऽविद्या प्रादुर्भूता। तस्य च सन्ध्यायतोऽज्ञानवान् बहिरन्तश्चाप्रकाशः संवृतात्मा नगात्मा मुख्यसर्गः सञ्जातः नगा मुख्या इत्यस्मात् सर्गस्यास्य मुख्यत्वम्।[28] इमं च सर्गमसाधकम् अभिज्ञाय तिर्यक्स्रोतसो निर्मितिर्जाता। अस्मिन् खलु उत्पथग्राहिणामज्ञाने ज्ञानमानिनाम् अवेदिनापश्चादीनां स्थितिर्भवति।[29] अस्मिन्नेव क्रमे देवसर्गोद्भवो जातः। परमेषा सर्वाऽपि सृष्टिर्नैव पुरुषार्थसाधिकेति ब्रह्मणा एकस्यापरस्यापि सर्गस्य सर्जना कृता। स चायं मनुष्यसर्गः। खलु प्रकाशबहुलाः, तमोद्रिक्ता रजोऽधिकाश्च भवन्ति। अत एव ते दुःखबहुलाः भूयोभूयश्च कारिणो भवन्ति।[30]

शेषभागः पंचमपुटे

चतुर्थपुटस्य शेषभागः

# विष्णुपुराणे सृष्टिविज्ञानम्

एवं चाहत्य महत्सर्गः, भूतसर्गः, वैकारिकसर्गः, मुख्यसर्गः, तिर्यक्स्रोताः (तैर्यग्योग्यः), ऊर्ध्वस्रोताः (देवसर्गः), अर्वाक्स्रोताः (मानुषः), अनुग्रहसर्गः, कौमारसर्गः इत्येवमभिधा नवसर्गाः प्रादुर्भूताः। एतेषु आद्याः त्रयः प्राकृतसर्गाः तदनुवर्तिनो पञ्च तु वैकृताः सर्गाः, अन्तिमः कौमारस्तु प्राकृतो वैकृतश्च इति समाख्यातिः।[31]

अत्र तिर्यस्रोतस्सम्बद्धाः पश्वादयोऽष्टाविंशद्वधात्मका भवन्तीत्युपवर्णितम्।[32] अष्टाविंशतिवधसन्दर्भ सांख्यकारिकायां विस्तरेण प्रतिपादितम् तदनुसारं त एते वधा अशक्तिरुद्दिष्टा। एते च एकादशेन्द्रियवधाः तुष्टिसिद्धीनां विपर्याच्च सप्तदश बुद्धिवधा इति समाहत्य अष्टाविंशप्रकारका भवन्ति-

एकादशेन्द्रियवधा सह बुद्धिवधैरशक्तिरुद्दिष्टा।
सप्तदशवधा बुद्धेर्विपर्यायातुष्टिसिद्धीनाम्।
आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभागाख्याः।
बाह्यविषयोपरमात् पञ्च च नव तुष्टयोऽभिमताः।।[33]
अष्टौ सिद्धयस्तासां विपर्ययोऽपि बुद्धिवध एव परिगणितः-
ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।
दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः।।[34] सृष्टिप्रकल्पाः-

संहारकाले समुपसंहृता अपि प्रजाः कुशलाकुशलैः पूर्वैः कर्मभिर्भाविताः ख्यात्या चानिर्मुक्ता एव भवन्ति। सृष्टिं च विदध तो ब्रह्मणः प्राथमिक्यश्चतस्रः प्रजा मानसा एव जाताः।[35] सर्गप्रवृत्तिकरणावसरे तु असुरदेवपितृमनुष्याणां यथाक्रमं प्रादुर्भावः। ब्रह्मणो युक्तात्मनः तमोमात्रोद्रेकस्तदा जघनप्रदेशादसुरोद्भवः। तस्मिँश्च कलेवरे परित्यक्ते विभावर्याः प्रकटनं भवति। तदनु सत्त्वोद्रेके जाते सति प्रजापतेर्मुखात् सुराः समुद्भूताः। सा च तनुर्यदा त्यक्ता तदा सत्त्वप्रायं दिनमभूत् अत एव रात्रावसुरा बलिनो भवन्ति दिवा तु देवताः। ततश्च ब्रह्मा सत्त्वमात्रात्मिकां तनुं जगृहे तस्याः पितरो जाताः। तस्याञ्च व्यक्तायां नक्तन्दिनान्तरस्थिता उत्कृष्टा सन्ध्या सिद्धा भवति। यदा च स एव प्रजापतिः रजोमात्रात्मिकामपरां तनुं जगृहे तदा रजोमात्रोत्कटा मनुष्याः प्रादुर्भवन्ति। मनुष्योत्पत्तिनिमित्तभूते शरीरे तु परित्यक्ते ज्योत्स्ना प्राक्सन्ध्या वा समभवत्।[36] अतश्च ज्योत्स्नाऽहर्दिवं सन्ध्या च चत्वार्येतानि ब्रह्मणः शरीराणि त्रिगुणसमाश्रयस्थलानि च भवन्ति।[37]

द्य प्रकृतप्रजासृष्टेरनन्तरं ब्रह्मणा पुनः अपरा तनुः रजोमात्रात्मिका संधारिता। तया ब्रह्मणः क्षुज्जाता। तस्याश्च कामोत्पत्तिः। तमिस्रायाञ्च तदा विभुः क्षुत्क्षामानसृजत। ते च विरूपाः श्मश्रुलाः ब्रह्माणमभ्यधावन।[38] तदा च यैरुक्तं 'मैवं भो रक्ष्यतामेषः' ते राक्षसाः जाताः। ये तु 'खादामः' प्रवृत्तिं वीक्षमाणस्य ब्रह्मणः केशाः समपतन। ते च पुनरारूढा इति सर्पणात् सर्पाः जाताः। नीचौनत्वाच्च अहयः संजाताः।[40]

एतानि सर्वाणि सृष्ट्वा वेधाः तच्छक्तिप्रचोदितः अन्या अपि प्रजाः ससृजे। स खलु स्वच्छन्दतः स्ववयसो वयांसि समसृजत। तस्य वक्षसोऽवयः, मुखतोऽजाः, उदतात्पार्श्वाभ्यां च गावः, पद्भ्यामश्वाः, रासभाः, मातङ्गाः, गवयाः, मृगाः, उष्ट्राः, अश्वतराः, न्यङ्कवोऽन्ये च समुत्पन्नाः। तस्य रोमभ्यः फलमूलिन्य ओषध्यः जज्ञिरे। कल्पारम्भे चौतान् विरचय्य त्रेतायुगमुखे अध्वरकर्मणि संयुयोज।[41] गौरजः पुरुषा मेषोऽश्वोऽश्वतरो गर्दभः - एते खलु ग्राम्याः पशवो भवन्ति। औदकाः सरीसृपाश्चात्र परिगणयितव्याः।[42] एतदनन्तरं वेधसा यज्ञानां प्रणयनं कृतम्। प्रथममुखाद् ब्रह्मा अग्निष्टोम, गायत्रं, त्रिवृत्सोमं रथन्तरम्, ऋचश्च निर्ममे। दक्षिणादास्याद् यजूंषि, त्रैष्टुभं छन्दः, पञ्चदशं स्तोमं, बृहत्साम, उक्थं चासृजत। पश्चिमान्मुखात् सामानि, जगति छन्दः, सप्तदशं स्तोमं, वैरूपमतिरात्रं चासृजत्। उत्तरात्तु मुखात् एकविंश स्तोमम्, अथर्वाणमाप्तोर्यामाणमनुष्टुभं वैराजं निर्मिमाय।४३

एवंरीत्या प्रतिकल्पमादौ यक्षपिशाचाप्सरोनरकिन्नररक्षसामन्येषाञ्च पशुमृगोरगाणां व्ययाव्ययरूपायाश्च स्थाणुजङ्गमप्रकृतेः सर्जना ब्रह्मणा क्रियते। इन्द्रियार्थेषु भूतेषु शरीरेषु च नानात्वं विनियोगं च धाता स्वयमेव व्यसृजत।[44] सिसृक्षाशक्या प्रचोदितो धाता कल्पादौ पुनः पुनरेवंरूपां सर्जनां करोति

**करोत्येवंविधां सृष्टिं कल्पादौ स पुनः पुनः।**
**सिसृक्षाशक्तियुतोऽसौ सृज्यशक्तिप्रचोदितः।।[45]**

एवस्मिन् शोधलेखे विष्णुपुराणसमुपवर्णितस्य सृष्टिप्रक्रियावर्णनस्य समुपबृंहणं कृतम्। एतेन च । पुराणकर्तुः विष्णोर्भगवतः समाराधनं विदितं भवति। वस्तुतो भारतीय वाङ्मये ऋगवेदादारभ्य पुराणवाङ्मयं यावत् सर्वत्र सृष्टिविज्ञानं विततमास्ते। क्वचित्तत् याथार्थ्यं बिभर्ति, अन्यत्र तु कविकल्पनाप्रसूतिरेव विराजते। तदत्र किं तत्त्वं तत्तु नूनं विद्वदवगाहनमेवापेक्षते। पुनरपि विष्णुपुराणे प्रकटितं सृष्टिप्रक्रियातथ्यं नूनं सहृदयानां मन आवर्जयति विदुषां चेतश्च चमत्करोत्येव।

**पादटिप्पण्यः**

1. सोऽहमिच्छामि धर्मज्ञ श्रोतुं त्वत्तो यथा जगत। बभूव भूयश्च यथा महाभाग भविष्यति। विपुव, १/१/४
2. तत्रैव, १/१/५-७ 3. तत्रैव, १/१/३९
4. तत्रैव, १/२/१-४ 5. प्रधानपुरुषव्यक्तकालानां परमं हि यत्। पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदम्। वि0पु0, १/२/१६
6. तत्रैव, वि0पु0, १/२/१८ 7. तत्रैव, १/२/१९-२२
8. तत्रैव, १/२/२४ ९. 9. तत्रैव, १/२/२७
10. तत्रैव, १/२/२९-३० ११. 11. तत्रैव, १/२/२३
12. ऋग्वेदः, १०/१२९/१ 13. तत्रैव, १०/१२९/२
14. विष्णुपुराणम्, १/२/३३. 15. तत्रैव, १/२/३४
16. तत्रैव, १/२/३५-३६ 17. तत्रैव, १/२/३८
18. विष्णुपुराणम् १/२/३९-४३ 19. विष्णपुराणम् १/२/४५
20. तत्रैव, १/२/४७-५१ 21. तत्रैवे, १/२/५३-५४
22. तत्रैव, १/२/५५ 23. तत्रैव, १/२/५६-५९
24. तत्रैव, १/२/६० 25. तत्रैवे, १/२/६१-६३
26. तत्रैव, १/२/७० 27. तत्रैव, १/५/३-७
28. तत्रैव, ७/५/९-११ 29. तत्रैब, १/५/१५-१८
30. तत्रैव, १/५/२०-२६ 31. तत्रैव,१/५/११
32. सांख्यकारिका, ४९-५० 33. तत्रैव, ५१
34. स्थावरान्ताः सुराद्यास्तु प्रजा ब्रह्मश्चतुर्विधाः। ब्रह्मणः कुर्वतः सृष्टिं जज्ञिरे मानसास्तु ताः। विपु0, १/५/२९
35. विष्णुपुराणम्, १/५/३०-३८
36. ज्योत्स्ना रात्र्यहनी सन्ध्या चत्वार्येतानि वै प्रभोः। ब्रह्मणस्तु शरीराणि त्रिगुणोपाश्रयाणि तु।। वि0पु0, १/५/४०
37. तत्रैव, १/५/४१-४२ 38. तत्रैव, १/५/४३
39. तत्रैव, १/५/४५ । 40. तत्रैव, १/५/४७-५०
41. तत्रैव, १/५/५१ 42. ४२. तत्रैव, १/५/५३-५६
43. तत्रैवे, १/५/६२ 44. तत्रैव, १/५/६६

**सन्दर्भग्रन्थसूची**

१. ऋगवेदसंहिता, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, सं० २००८ ईव
2.श्रीविष्णुपुराणम्, गीताप्रेसः, गोरखपुरम्, सं० २०६३ वि0सं0 3. सांख्यकारिका, ईश्वरकृष्णविरचिता, व्याख्याकारः, ज्वालाप्रसाद गौड़ः, चौखम्बा विद्याभवनम्, वाराणसी, सं० १९९८ ई०

(कथा)

# पत्रमित्रम्

मूलकथाकारः-जि.श्रीनिवास रावः
अनुवादकः-सूर्यप्रकाशशुक्लः

कतिकृत्वः लघ्व्यः लघ्व्यः प्रारम्भिकवार्ता जीवनस्य महदनुभवेषु विकसिता भवन्ति। सत्यमिदं मया स्वजीवनस्य एकया घटनया उद्घाटितं यस्याः प्रकटीकरणे विंशतिवर्षाणां कालो व्यतीतः। एषा घटना ईदृक्प्रभातवेलया प्रारब्धा यदा अहमेक एकविंशतिवर्षीयो विद्यालयीयश्छात्र आसम्। मुम्बैनगरस्य एकस्या जनप्रियपत्रिकाया एकं पृष्ठमपश्यं यत्र विश्वस्य ईदृशां सर्वेषां यूनां पत्रसङ्केता अङ्किता आसन् ये भारते पत्रमित्रं प्राप्तुम् इच्छन्ति स्म। अहं स्वकक्षायाः तादृशान् बालकान् बालिकाश्च दृष्टवान् ये अपरिचितेभ्यो जनेभ्यो गुरुतरभाराणि पिहितपत्राणि प्राप्नुवन्ति स्म। एतत् तदानीन्तनकाले भृशं प्रचलितमासीत्। तदा अहं कथं प्रयास न अकरिष्यम्? ।

अतः अहं ''लॉस एन्जिलिस'' इति नगरस्य एकस्या ''एलिस एच.'' इत्याख्याया महिलायाः पत्रसङ्केतम् अचिनवम्, एकां बहुमूल्यां लेखनपीठिकां क्रीतवान् च। मम कक्षाया एका बालिका एकदा मां बोधितवती यत् तस्यै पाटलवर्णीयकर्गदेषु लिखितानि पत्राणि अत्यधिकं रोचन्ते। एवमहमेकस्या महिलाया हृदि प्रवेष्टुमेकं मन्त्रं प्राप्तवान् आसम्। अतो मयापि एलिसकृते पाटलवर्णीयकर्गदे पत्रं लेखनीयम् आसीत्।

यथा एको विद्यालयीयः छात्रः स्वप्रथमपरीक्षाकाले भयाक्रान्तो भवति तथैव अहमारब्धवान् - प्रिय पत्रमित्र, इति। किमप्यधिकं वक्तुं नैव आसीत्। मम लेखनी यदि अचलत् अपि तर्हि शनैः शनैः एव। पत्रालये पत्रपेटिकायां पत्रं निक्षिपन् अहं तथैव अनुभूतवान् यथा शत्रोः भुशुण्डिकातः प्रहारः प्रारब्धः।

सद्रात् कैलीफोर्णियातः पत्रोत्तरं मम आशाया विपरीतं शीघ्रमेव आगतम्। ''अहम् आश्चर्यचकिता अस्मि यत् मम पत्रसङ्केतो भवतो देशस्य पत्रिकायाः पत्रमित्रस्तम्भे कथं प्राप्तः। ततोऽप्यधिकमाश्चर्यान्विता यदहं कदाचिदपि मित्रतां कर्तुं न इष्टवती। किन्तु अदृष्टात् । अपरिचितात् च कस्माञ्चित् जनात् पत्रस्य प्राप्तिः मम कृते शोभना अस्ति। भवतु नाम, अहं भवता पत्रमित्ररूपेण इष्टा अस्मि... अहम् अस्य अनुमोदनं करोमि।'' इति एलिस-महोदया पत्रे लिखितवती।।

अहं न जानामि यत् तत् लघुपत्रमहं कतिवारमपठम्। तस्मिन् पत्रे जीवनस्य सम्पूर्णं सङ्गीतं व्याप्तमासीत्। मया अनुभूतं यदहं सप्तमस्वर्गे आसम्।

अहं स्वपत्रव्यवहारकर्मणि दत्तावधान आसम्। अहं तथा किमपि न लिखामि स्म येन काचिद् अपरिचिता अमेरिकादेशीया बाला क्रुद्धा भूयात्। आङ्ग्लभाषा एलिसमहोदयायाः कृते स्वाभाविकी भाषा आसीत् किन्तु मम कृते तु कष्टसाध्या एका विदेशिनी भाषा आसीत्। स्वशब्देषु वाक्येषु च अहं भावुकः लज्जाशीलश्चासम्, किन्तु मम हृदयस्य कस्मिंश्चित् कोणे स्नेहभावोऽन्तर्हित आसीत्। अस्य स्नेहभावस्य प्रकटनं मम कृते दुष्करमासीत्। स्वीयेन सुन्दरेण सारगर्भितसंयतलेखनेन एलिसमहोदया सुविस्तृतानि पत्राणि लिखति स्म किन्तु स्वस्य विषये सा किमपि न प्रकटयति स्म।

सहस्रं क्रोशान् समुल्लङ्घ्य पुस्तकैः पत्रिकाभिः लघुभिरुपहारैश्च प्रपूरितानि दीर्घाणि पिहितपत्राणि मम समीपमागच्छन्ति स्म। अहं निःसन्देहेन ज्ञातवान् यत्। एलिसमहोदया एका धनसम्पन्ना अमेरिकादेशीया महिला अस्ति। सा स्वोदारोपहारवत् सुन्दरी अपि अस्ति। इत्थम् अस्माकं पत्रमित्रता चापि सफला आसीत्।।

तथापि एकः प्रश्नः मम मस्तिष्कोपरि आघातं करोति स्म। कस्या अपि बालिकाया आयुः न प्रष्टव्यं चेत् छायाचित्रयाचने का हानिः? अतः अहं स्वनिवेदनं लिखितवान्, पत्रोत्तरं चापि पाप्तवान। एलिसमहोदया लिखितवती यत् अधुना तस्याः पार्श्वे किमपि छायाचित्रं नास्ति। किन्तु भविष्ये कस्मिंश्चिद् दिवसे सा एकं छायाचित्रमवश्यमेव प्रेषयिष्यति।

किं सा एका निलीयनप्रकटनक्रीडा (game of hide & seek) आसीत्? वर्षाणि व्यतीतानी जातानि। एलिसमहोदयया सह मम पत्रव्यवहारो न्यूनो जातः किन्तु न समाप्तः। यदा सा रुग्णा भवति स्म तदा अहं तस्यै शुभकामनाः प्रेषयामि स्म। कदाचित् क्रिसमासपत्राणि उपाहारान् चापि प्रेषयामि स्म। अस्मिन्नेव अवधौ अहं सांसारिको जनोऽभवं, वयस्को जातः। वत्तिमपि प्राप्नुवम्। मम पत्नी आगता, बालाश्चापि अभवन्। अहं स्वपत्नीम् एलिसमहोदयायाः। पत्राणि दर्शितवान्। एलिसमहोदयया सम्मेलनार्थं मम, मम परिवारस्यापि मनसि उत्कण्ठा विद्यमाना एव आसीत्।

एकस्मिन् दिवसे अहमेकं दीर्घं पुटकं प्राप्तवान्। तत् एलिसमहोदयाया नगरतः प्राचीनअमेरिकातो वायवीयपत्रसेवया आगतमासीत्। पुटकस्य उद्घाटनावसरे अहमाश्चर्यचकित आसं यद् एषा एका नवीना पत्रमित्रं का आसीत् ।

तत्र काश्चित् पत्रिका एकं लघुपत्रं चासीत्। तस्मिन् पत्रे लिखितमासीद् यद् भवान् एलिसमहोदयां सम्यग्रूपेण जानाति। एलिसमहोदयाया मित्रत्वाद् अहं भवन्तं दुःखेन सूचयामि यद् ''गतरविवासरे सा वस्तूनां क्रयार्थं विपणी गतवती आसीत्। तत्र चर्चरतः। प्रत्यागमनकाले सा कारदुर्घटनया मृता जाता। विगते अप्रैलमासे सा अष्टसप्ततिवर्षीया जाता। अतो वृद्धत्वात् सा वेगेन आगच्छत् कारयानं द्रष्टुं न अशक्नोत्। एलिसमहोदया मां कथयति स्म, यद् भवतः पत्राणि प्राप्य सा अतीव प्रसन्ना भवति स्म। सा सर्वथा एकाकिनी आसीत्। परिचिता उत अपरिचिताः, समीपस्था उत दूरस्था जना भवेयुर्नाम, सर्वेषां सहयोगः तस्याः स्वभाव आसीत्।'' लेखिकया अन्ते निवेदनं कृतमासीद् यत् ''मम पत्रेण सह संलग्नम् एलिसमहोदयायाः छायाचित्रं स्वीकरणीयम्'' इति। यतो हि मृत्योरनन्तरमपि सा केवलं मत्कृते स्वच्छायाचित्रं प्रेषयितुमिच्छति स्म।

एतत् सौन्दर्यस्य करुणायाश्च मुखमासीत्। तद् एतादृशं मुखमासीत् यस्मै लज्जाशीलः विद्यालयीयः छात्रः सन्नपि अहमस्पृहयम्। सा एका वृद्धा आसीत्।

साभारः 'विश्वम्भरा'

# संस्कृतवाङ्मये वर्णितस्य वनस्पत्यौषधिविज्ञानस्य महत्त्वम्



ब्रजेशकुमारझाः
शोधच्छात्रः-( वेदविभागः )
श्रीला.ब.शा.रा.सं.विद्यापीठ नई दिल्ली-१६

वेदाः समस्तचराचरजगतः प्राणस्वरूपास्सन्ति। संस्कृतवाङ्मयस्य आधारस्तम्भा वेदास्तु ज्ञानविज्ञानयोरनन्तभाण्डागारा एव सन्ति। प्राचीना ऋषयो मुनयश्च येषां वैज्ञानिकरहस्यानां तथ्यानां वा विषये गम्भीरतमं चिन्तनम्मननं कृतवन्तस्ते वेदेषु वर्णितास्सन्ति। तस्मादुक्तं कठोऽपनिषदि यत्-

**यदेवेह तदमुत्र यदमुत्र तदन्विह।**
**मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।।**[१]

इत्युक्तिर्न केवलं कठोपनिषद् सम्बन्धाऽस्ति अपि तु समस्तं संस्कृतवाङ्मयमपि बोधयति। संस्कृतवाङ्मये विविध वैज्ञानिकविषयाणां विस्तृतरूपेण विवेचनानि सन्ति। तस्मिन्नेव क्रमे **संस्कृतवाङ्मये वर्णितस्य वनस्पत्यौषधिविज्ञानस्य महत्त्वम्** इति विषयं स्वीकृत्य स्वयं शोधपत्रं प्रस्तौमि।

जीवानां स्वभाविकी क्रिया भवति श्वासग्रहणमिति अर्थात् सर्वास्ववस्थासु जीवैः स्वासग्रहणं क्रियते। श्वासग्रहणकाले ऑक्सीजनगैसस्य ग्रहणं क्रियते उच्छ्वासकाले च कार्बनडाइऑक्साइडगैसस्य उत्सर्जनं क्रियते। परं वनस्पतीनां वृक्षाणामेषः स्वभावो यत् ते दिवा ऑक्सीजनगैसस्य उत्सर्जनं कुर्वन्ति कार्बनडाईऑक्साइडगैसस्य च ग्रहणं कुर्वन्ति। तेन वायुमण्डले प्राणापानयोरुभयोः गैसयोः सामञ्जस्यं स्थापितं भवति। वृक्षेजु प्राणतत्त्वस्यो-त्सर्जनत्वान्मानवैश्च तद्ग्रणत्वाद् वृक्षाः वनस्पतयः प्राणस्वरूपाऽस्सन्ति।

तदुक्तं श्रुतौ-**प्राणौ वै प्रजापतिः**[२]इति। यजुर्वेदेऽपि **वनस्पतिः शमिता**[३] अर्थाद् वृक्षवनस्पतयः प्राणतत्त्वम् उत्सृज्यापानतत्त्वं गृह्णन्ति। अपानवायुः मानवैरुत्सर्जितः तत् प्रदूषितो भवति वायुमण्डले यदि तस्याधिक्यं भविष्यति चेत्सर्वमिदं जगत्प्रदूषितं भविष्यति, तस्मात् प्रदूषणग्रहणेनैमे वायुमण्डलं संशोधयन्ति। अत एव वनस्पतीनां कृते **शमिता** शब्दस्य प्रयोगो भवति। **शमिता=शमनकर्ता** वनस्पतयः प्रदूषणानि शमयित्वा प्राणतत्त्वानि प्रयच्छन्तीति। यथा लोके माता शिशुनां संरक्षणं सम्वर्धनञ्च सर्वविधप्रयत्नैः करोति तदेव वृक्षाः वनस्पतयोऽपि जगत्कल्याणाय मातृवत् प्रदूषितानि तत्त्वानि शमयित्वा शिशुसदृशान् मानवादीन् जीवान् संरक्षयन्तीति। तस्मादुक्तं शुक्लयजुर्वेदे- **ओषधीरिति मातरः**[४] इति। वनस्पतयः विविधं विषं नाशयन्ति, शमयन्तीति। ओषधिशब्दस्यार्थं कुर्वता श्रीमता यास्काचार्येण निरुक्तग्रन्थे भिहितम्-**ओज़धयः ओज़द् धयन्तीति वा। ओषत्येना धयन्तीति वा। दोषं धयन्तीति वा।**[५] **ओषं धयेति तत ओषधयः समभवन्**[६] इति। तथा च **ओषधयः फलपाकान्ताः** सायणाचार्योऽपि **ओषः पाकः फलपाकः यासु धीयत इति ओषधयः** इत्युक्तः। अर्थाद्येषां फलानि पक्वानि भवन्ति पक्वे फले च येषां शरीराणि नष्टानि भवन्ति ता ओषधय उच्यन्ते। तद्यथा मनुस्मृतौ-

**उद्भिजाः स्थावरा सर्वे बीजकाण्डप्ररोहिणः।**
**ओषध्यः फलपाकान्ताः बहुपुष्पफलोपगाः।।**[७]


## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमम्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रियन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।


उप्तं बीजं भूमिं च भित्वा विदार्य जायन्ते वृक्षाः ते उद्भिजाः। सर्वे बीजात्काण्डाच्च प्ररोहन्ति जायन्ते मूलस्कन्धादिना दृढीभवन्ति तत ओषधय इति। इदं तासां स्वाभाविकं कर्म। पाकान्ताः फलपाकः अन्तो नाश आसामिति। पक्वे फले व्रीह्यादयो नश्यन्ति बहुना च पुष्पफलेनोपगताः युक्ता भवन्ति। औषधीनां वृक्षाणां च यथासम्भवमेतद्विशेषणमिति। तद्यथा-

**अपुष्पाफलवन्तो ये ते वनस्पतयः स्मृताः।**
**पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः।।**[८]

अर्थात् विना पुष्पेण फलं जायते येषां ते वनस्पतयः कथ्यन्ते, न वृक्षाः। पुष्पिणः फलिनश्च वृक्षा उभययोगात्। क्वचिद्वनस्पतयो वृक्षा अपि उच्यन्ते, वृक्षाश्च वनस्पतयोऽपि। तत्र प्रकरणभेदेन वनस्पतिशब्दस्य विभिन्नप्रकारका अर्थाः प्रतिपाद्यन्ते। तत्र निरुक्ते यथा- **तत्को वनस्पतिः? यूप इति काथक्यः। अग्निरिति शाकपूणिः।**[९] तद्यथा ऋग्वेदे तृतीयमण्डले- **अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन।**[१०] इमे वनस्पतयोऽन्तःसञ्ज्ञोपेताः जगतां हितसाधकाः मानवजातेः परिपालकाः भवन्ति। तथा हि शुक्लयजुर्वेदे सप्तदशाऽध्याये **अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि सम्भृतं पयः**[११] अत्रापि वनस्पतिभ्य एज़ जायते। वनानां काष्ठानामन्तः स्थितः सन् तेषां परिपालको भवतीति पार्थिवाग्निरत्राभिप्रेतः। अयमेव काष्ठस्थः यज्ञेषु अरणीभ्यामश्वत्थशमीभ्यां मथ्यमानो जायते। अत एवोच्यते वानस्पत्योऽग्निरिति। काष्ठेऽप्यग्निर्भवतीति वेदेभ्य एव ज्ञायते। तद्यथा अथर्ववेदे-

**वैयाघ्रो मणिर्वीरुधां त्रायमाणोऽभिशस्तिपाः।**
**अमीबाः सर्वारक्षांस्यप हन्त्वधि दूरमस्मत्।।**[१२]

अर्थात् हीरा-पुष्पराग-स्फटिकादयो मणयः खनिजाः। प्रबालमुक्तादयः समुद्रजाः गजमुक्तसर्पम्यादयः प्राणिजाः। उपर्युक्ताथर्ववेदीयमन्त्रेण वानस्पत्यको लाभो भवतीति। मानवस्य मनसि प्रसन्नता, स्वास्थ्यस्य लाभः, नीरोगत्वम्, विषनिवारणमित्यादयो लाभाः भवन्ति। वानस्पत्यमणीनां सम्बन्धे कौटिल्याऽर्थशास्त्रस्येदं वचनं द्रष्टव्यम्-

**जीवन्तीश्वेतामुष्ककपुष्पवन्दाकानामक्षीबे जातस्याश्वत्थस्य मणिः सर्वेविषहरः।**[१३] ओषधीनां हस्ते धारणेन बन्धनेन वा विषयुक्तस्यान्यस्यापि विषं निर्बलं भवति। तद्यथा-

**मूषिकाऽजरुहा वापि हस्ते वध्वा तु भूपतेः।**
**करोति निर्विषं सर्वमन्नं विषसमायुतम्।।**[१४]

सर्वभयविघ्ननिवारणार्थम् मातरः शिशूनां संरक्षणाय कुदृष्टिनिवारणाय च कट्यां गले वा बाहौ च वनस्पतीनां धारणं कारयन्ति। न केवलं मनुष्याणामेव रक्षां कुर्वन्ति अपि तु पशूनामपि दृश्यते। एवाद्यापि ग्रामे पशूनां रक्षायै अपि गलप्रदेशे वनस्पतीनां धारणं कारयन्ति। एवमेव ऋग्वेदे सोमस्य वनस्पतिरूपेण महत्त्वं प्रतिपाद्यते- **वनस्पतिं पवमानमध्वा समङ्ग्धि धारया।**[१५] अथर्ववेदे एकोनविंशतिकाण्डस्यैकत्रिंशत्तमे सूक्ते औदुम्बरवनस्पतेः मणिरूपेण महत्त्वं प्रतिपाद्यते। तद्यथा-

**औदुम्बरेण मणिना पुष्टिकामाय वेधसा।**
**पशूनां सर्वेषां स्फातिं गोष्ठे मे सविता करत्।।**[१६]

**अस्माकं जीवने औदुम्बरस्य वनस्पत्यौषधिरूपेण कीदृशं वैज्ञानिकं महत्त्वं भवतीति पश्यामः। तद्यथा-**

1. औदुम्बरवृक्षस्य समन्ततः फलानि भवन्ति। फले वटवृक्षवत् बहुबीजाः भवन्ति। यदि प्रसूतायाः स्त्र्याः दुग्धसम्वधनार्थं वनस्पतेस्त्वक् पिष्ट्वा पानं कारयेत् तेन लाभो भवति।
2. उदुम्बरमूलं विधिना गृहीत्वा कुट्टनेन रसं सम्पाद्य तत्र सितोपलां मिश्रीकृत्यः प्रतिदिनं प्रातः सायं च यदि पानं क्रियते तर्हि सर्वविधप्रमेहस्य शान्तिर्भवतीति।
3. ब्रणस्य शीघ्रशमनाय उदुम्बरस्य त्वक् पिष्ट्वा लेपनेन शीघ्रलाभो भवति।
4. उदुम्बरस्य फलं घृतेन भृष्ट्वा भक्षणेन शुक्रवृद्धिर्भवति।
5. उदुम्बरवृक्षमूले यदि अस्थिरगर्भस्त्री प्रतिदिनं सायंकाले घृतदीपं प्रज्वालयति तर्हि तस्याः गर्भः स्थिरो भवति।
6. शनिवासरे, रविवासरे वा यथाविधि उदुम्बरस्य मूलमानीय यदि स्त्री कट्याः वामपार्श्वे धारयति तर्हि श्वेतप्रदररुजः अनियमितऋतुदोषस्य च निवारणं भवति।
7. सर्वभयनिवारणाय तन्मूलं दक्षिणहस्ते धारणं कुर्यात् स्त्री च वामहस्ते। तेन मानवस्य रक्षा भवति।
8. शरद् ऋतौ कस्मिन्नपि शनिवासरे उदुम्बरमूलमानीय यदि क्षेत्रे निखन्यते तर्हि धान्यादि शस्यानां वृद्धिर्भवति। तद्यथा

अथर्ववेदे-

**करीषिणीं फलवतीं स्वधामिरां च नो गृहे।**
**औदुम्बरस्य तेजसा धाता पुस्टिं दधातु मे।।**[१७]
**उप मौदुम्बरो मणिः प्रजया च धनेन च।**
**इन्द्रेण जिन्वितो मणिरा मागन्त्सह वर्चसा।।**[१८]
**इमां खनाम्योज़धिं वीरुधां बलवत्तमाम्।**
**यया सपत्नीं बाधते यया संबिन्दते पतिम्।।**[१९]

एतत् समस्तमपि रहस्यम् अथर्ववेदीयवनस्पतिसूक्ताध्ययनेन स्पष्टं भवति। स्वाभीष्टलाभार्थं वनस्पतीनामुपयोगो भवति। तस्य ग्रहणं क्रियते तर्हि पूर्णलाभाय भवति। शुक्लयजुर्वेदे **द्यौः शान्तिः** इति मन्त्रप्रसङ्गे **वनस्पतयः शान्तिः** इत्युच्यते। स्वस्थजीवनयापनाय सकलदोशशून्यस्य पर्यावरणस्यावश्यकता भवति। शुक्लयजुर्वेदस्य षोडशतमाऽध्यायस्य रुद्रसूक्ते **शिवः वृक्ष-वनस्पति-वनौषधि-लता- गुल्मादीनाञ्च स्वामी उक्तः।** तद्यथा-**अन्नानां पतये नमः, जगतां पतये नमः, वनानां पतये नमः, वृक्षाणां पतये नमः, आरण्यानां पतये नमः**[२०] इति।

महीधरभाष्ये अन्नानां पालकाय नमः, भवस्य संसारस्य हेत्यै आयुधाय संसारनिवर्तकाय रुद्राय नमः। वनानां पालकाय नमः, वृक्षाणां पालकाय नमः, अरण्यानां वनानां पतये नम इति। यदि वृक्षाणां कर्तनम् अधिकाधिकं क्रियते चेत् वृक्षाणामुपस्थितरत्राल्पा भविष्यति तेन कारणेन ऑक्सीजननाम्नो गैसस्य अभावो भविष्यति। फलतः प्राणवायोरभावः भविज्यति। तसमात् कारणात् संसारस्य स्वयं विनाशः सुनिश्चितमेव। यथा- वृक्षा मधुराणि, अमृतानि फलानि प्रयच्छन्ति। ते वर्षकान् मेघान् स्वसम्मुखमाकर्षयन्ति, पृथिवीं च द्रवयन्ति। एते सर्वे विषयाः संसारकल्याणायोपयुक्ताः। अर्थाद् वृक्षाणां हिंसनं न कर्तव्यम्। तस्मादुक्तं यजुर्वेदे **अपः पिन्वौषधीर्जिन्व**[२१]इति। हे इष्टके, त्वमपो जलानि पिन्व सिञ्च। पिन्वितिः सेचनार्थ ओषधीर्जिन्व प्रीणय इति। अनेन जलसिञ्चनेन वृक्षाणां रक्षणं भवतीति।

ऋग्वेदे मानवानां रक्षकत्वेन वृक्षवनस्पत्यौषधयः पर्वताश्च वर्णिताः सन्ति। तद्यथा- **आप ओषधीरुत नोऽवन्तु, द्यौर्वना गिरयो वृक्षकेशाः**[२२] इति। वनेषु विविधेषु वृक्षेषु सुगन्धितानि पुष्पाणि मधुराणि फलानि चोत्पद्यन्ते। येन वनेषु गत्वा मानवा आनन्दमनुभवन्ति। एवं प्रकारेण वेदे विविधान्युदाहरणानि वानस्पत्यौषधिविषये प्राप्यन्ते। तद्यथा-

१. **वनस्तेऽव सृजा रराणः।**[२३]
२. **वानस्पत्या ग्रावाणो।**[२४]
३. **ओषधयो भूतभव्यमहोरात्रे वनस्पतिः।**[२५]
४. **ओषधीरेव रथन्तरेण देवा।**[२६]
५. **ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरी।**[२७]
६. **या ओषधीः पूर्वा जाता।**[२८]
७. **याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहिसः।**[२९]

अतः सिद्धयति यद्वृक्षा अस्माकं रक्षणं कुर्वन्ति अस्माभिश्च वृक्षाणां रक्षणं सर्वविधप्रयत्नेन कर्तव्यम्। एवमेव वष्टक्षा अस्माकं प्राणदायका इति। अत अस्माभिः वृक्षाणां पालनं कर्तव्यम्। वनानामौषधीनाम् अस्माकं जीवनेन सर्वविधसुखशान्त्यर्थम् अत्यन्तम्महत्त्वमस्ति इति सिद्धयति। वनस्य विज्ञये बृहदारण्यकोपनिज़दि उक्तम्-

**यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा।**
**तस्य लोमानि पर्वाणि त्वगस्योत्पाटिका बहिः।।**[३०]

अर्थाद् वृक्ष-वनस्पतयोऽपि मनुष्यसदृशा एव सन्ति, यथा मनुष्यशरीरे लोमानि तथैव वृक्षेषु पत्राणि भवन्ति, उभयोरपि शरीरयोः त्वक् भवन्ति। मनुष्यस्य त्वक् कर्तनेन रक्तं निःसरति वृक्षाणां च त्वग्भिः रसः निःसरति, मानवशरीरे मांसो भवति

शेषभागःसप्तमपुटे

# संस्कृतवाङ्मये वर्णित–नाट्यशास्त्रस्योपयोगिता

**मुनेशः कुमारः**
शोधच्छात्र (साहित्य विभाग)
राष्ट्रिय संस्कृत संस्थानम्, जनकपुरी नवदेहली

येन प्रकारेण शरीरेषु आत्मनः स्थानं भवति तैनेव प्रकारेण मानवस्य समग्रविकासे भरतमुनिना रचितः नाट्यशास्त्रस्य स्थानं भवति। यतोहि नाट्यशास्त्र संस्कृत साहित्ये अद्भुत् कलानां कोशं वर्तते। जगति नाट्यशास्त्रमिव अन्य ग्रन्थों नास्ति। नाट्यशास्त्रस्य प्रमुखा विशेषता संश्लेषणात्मकमस्ति। भरतस्य नाट्यशास्त्रे तत्कालीन समाजे विभिन्न जनानां कृते, विभिन्न कलानां वर्णनं प्राप्तुं शक्यन्ते। उक्तं च –

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।[1]
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।

अर्थात् नाट्यशास्त्रे ज्ञानस्य, शिल्पस्य कलायाः च विस्तृत वर्णनं वर्तते। भरतमतानुसारेण नाट्यशास्त्र पंचमं वेदः अस्ति।

यतोहि नाट्यशास्त्रे सर्वेषां कृते कलानां, विद्यानां, च, वर्णनं समाजस्य अन्यवर्णैः सह शुद्रस्यपि कृते अस्ति। अन्य वेदाः तु द्विजवर्णानां कृतेव आसन्। तेषां वेदानां प्रयोगः अध्ययनं वा स्त्री शुद्रं च न कर्तुं शक्यन्ते। नाट्यशास्त्र ग्रन्थे श्रव्य च उभयविध काव्यस्य सम्यक्रुपेण वर्णनमस्ति।

भरतप्रणीत नाट्यशास्त्रे षट्त्रिंशत् अध्यायेषु विभक्तमस्ति। तेषु अध्यायेषु षट्सहस्त्रं श्लोकाः सन्ति। केशांचिद् विदुशां विद्वानां मतानुसारेण नाट्यशास्त्रे अध्यायानां संख्या सप्तत्रिंशतः (37) एव अस्ति। नाट्यशास्त्रस्य प्रथमाध्याये नाट्यशास्त्रस्य द्विजोत्पत्ति सन्दर्भे वर्णनमस्ति। द्वितीयाध्याये तत्कालीन प्रेक्षागृहानां वास्तुकलायाः वर्णनमस्ति। चतुर्थे अध्याये ताण्डव नृत्यस्य वर्णनमस्ति।

वर्तमान समये नाटके यस्याः कलायाः विकसित रूपं दृश्यन्ते तस्याः कलायाः आधार नाट्यशास्त्रे वर्तते। भारतीय कलायाः मीमांसायां क्षेत्रे सर्वप्रथम भरतस्य नाट्यशास्त्रमेव वर्णनमस्ति। भरतात् पूर्व वैदिक युगे कलायाः रूपं शिल्पमेव आसीत्।

उपनिषदां कथ्यते ''रसौ वै सः''[2]। एतेषाम् अनन्तरं भरतेन एव कलायाः व्यापकस्वरूपं मानवानां कृते विकसितं कृतवान्। भरतस्य कलायाः उद्देश्यं कैवल्यं मोक्षं वा नास्ति परं मानवाय श्रमं दूरं कृत्वा तस्य मनसि स्फूर्तिमआनन्दं च प्रकटीभूतं कृतवान्। भरतेन नाट्यशास्त्रं कथ्यते यत् '' विभावानु भावव्यभिचारी संयोगात् रसनिष्पत्तिः[3] अर्थात् विभाव, अनुभाव, व्यभिचारी च संयोग कृत्वा रसस्यैव उत्पत्ति भवति। भरतेनैव सर्वप्रथम कलामीमांसायाः मानवानां मनसि व्याप्त भावानां मनोवैज्ञानिकं अध्ययनं कृतवान्। वर्तमान समये मंचे नृत्य, भावभिनय, संवाद, काव्यपाठम्, अंगविलासः भयः, कम्प, स्वेद, हास–परिहासः च युक्त कलायाः विकास नाट्यशास्त्रेव आसीत्। एतत् प्रसंगे भरतः कथयति यत् –

नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।[4]
लोकवृत्तानुकरणं नाट्यमेतन्मषा कृतम्।।

नाट्यशास्त्रमेव सर्वासां कलानां कोषं वर्तते। नाट्यशास्त्रे भरतः कथयति यत् नाट्ये तदेव काव्यम् अपेक्षितमस्ति यस्मिन् काव्ये रसमयता भवति। येन प्रकारेण शुष्क काष्ठे अग्नि व्याप्तं भवति तैनेव प्रकारेण रसपुर्णं काव्यस्यार्थः अस्माकं शरीरे व्याप्तं भवति। उक्तं च –

एवं गीतं च वाद्यं च नाट्यं च विविधाश्रयम्।[5]
अलातचक्रप्रतिमं कर्त्तव्यं नाट्ययोक्तृभिः।।

अर्थात् नाटके संगीत, काव्य, अभिनयं, नृत्यं, वाद्य, प्रतिमा च सर्वानां प्रयोग एकत्र स्थाने कृते सति रसस्यैव वास्तविकरूपेण अनुभूतिं वर्तते।

अभिनव इति कस्मात्? भरतः मुनि कथयति यत् यस्मात् प्रयोगनयति तस्मादभिनयः स्मृत। अतः यादृशं अभिनयं मनुष्याः कुर्वन्ति तादृशमेव अभिनयं मनुष्येतर प्राणिनः न कर्तुं शक्नुवन्ति। भरतमतानुसारेण आंगिक, वाचिक, सात्विक आहार्यं च अभिनयस्य रुपं भवति। यदा मानव विविध अंग प्रत्यांग माध्यमेन विविध प्रकाराणां चेष्टानां भावानां वा रमणीय प्रदर्शनं करोति तद् आंगिक अभिनय भवति। उक्तं च –

यतो हस्तः ततो दृष्टिः यतो दृष्टिः ततो मनः।[6]
यतो मनः ततो भावः यतो भावः ततो रसः।।

ये हस्ता आन्तरीं चित्तवृत्तिं सूचयन्ति कपोतक इव भयं, कर्कटक इव मदनविज्रम्भां दोल इव शोकं शुकतुण्डीव ईर्ष्या ते कार्या एव इत्यावृत्या ये तु वाह्यद्रव्यं गुणादिगमकास्ते न कर्त्तव्या। वर्तमान समये नाट्यशास्त्रे वर्णितः उदरस्याभिनयेन माध्यमेन विभिन्न व्याधिनां समाधानं प्राप्तुं शक्यन्ते। भरतस्य मतानुसारेण ''कोहलेन प्रयोगबलाद् व्यपदिष्टं शुष्काक्षरगानं कृत्वा प्रवेश एव समुचित स्थानक दृष्टिमुखरागदिन्युक्तो कर्त्तव्यः यथा सामाजिकानां झटित्येवान्विताभिद्या – नन्यायेन मुख्य रसव्याप्तिरुदयते।''[6]

भरतेन नाट्यशास्त्रे सर्वाषाम् अभिनयकलानां सूक्ष्मरुपात् वर्णनम् अकरोत्। तेषां मतानुसारेण कलायाः सचालनं आंगिक, वाचिक सात्विक, आहार्यम् अभिनयं च माध्यमेनैव भवति। एतद्तिरक्तिं सामान्यभिनयस्य अपि पृथक् रूपात् वर्णनं कृतवान।

भरतेन मानवीय व्यवहारस्येव आचारस्य अपि अभिनयकलायाः रूपे मनोवैज्ञानिक माध्यमेन अपि वर्णनं कृतवान्। येन प्रकारेण वेदाः अस्माकं दार्शनिकम् आध्यात्मिकं च क्षुधायां शतवर्षात् अधावधि पर्यन्तं शान्तं कुर्वन् आगच्छन्ति तैनेव प्रकारेण इदं पंचमवेद अर्थात् नाट्यशास्त्रमपि स्व स्वभावात् सार्वजनीन कलाशास्त्रीय रक्षात्मकं क्षुधायां वर्तमान समये अपि शान्तं करोति। उक्तं च –

नना शीलाप्रकृतयः शीले नाट्यं प्रतिष्ठितम्।[7]
तस्माल्लोक प्रमाणं हि विज्ञेयं नाट्योक्तृभिः।।

भरतः नृत्यकलायामपि नाट्कस्य प्रमुख अंगरूपेण स्वीकुर्वन्ति। यतोहि भरतस्य समये संगीतस्यर्थः गीतं वाद्यं नृत्यं च त्रिस्त्रं कलानां समयोजनम् आसीत्। वर्तमान समये इमे त्रिस्त्रं कला न केवलं भिन्न – भिन्न रूपे दृश्यते परं एतेषां कलानां अवान्तर भेदाः अपि सन्ति। भरतसमकालीन कलायाः या स्वरूपं भारते वर्तमान समये अस्ति। परं विदेशे वाद्यवृंदं पृथकरूपेण संगीत क्षेत्रे विकसित अस्ति। परं भारते संगीत क्षेत्रे वाद्यवृन्दस्य विकास न अभवत्। धनंजयः दशरूपकस्य प्रथम प्रकाशे कथयति यत्'' अन्यद्भावाश्रयं नृत्यम्''[8]।।

अर्थात् नाट्य रसे आधारितं भवति परं नृत्य भावे आश्रितं भवति। अतः नाट्यात् नृत्य भिन्नं भवति। अत्र भावाश्रय शब्दस्यर्थः विषयस्य भेद भवति। नृत्यशब्दस्यर्थः आंगिक अभिनयं भवति। यतोहि नृत्य शब्द नृत् धातो निष्पन्नं भवति। यस्यर्थः भवति गात्र, अगानां च संचालनम्। धनंजयः कथयति यत् ''नृत्तं ताललयाश्रितम्''[9] तेषां मतानुसारेण नष्त्यं सर्वदा तालयादि आश्रितं भवति।

भारतीय संस्कृतौ नृत्यकलायाः प्रारम्भ भगवान शिवस्य नष्त्यात् एव भवति। यतोहि भरतः मतानुसारेण शिवं एव नष्त्यस्य प्रथम प्रयोक्ता सिद्धं भवति। उक्तं च

मयापीदं स्मृतं नृत्यं संध्याकालेषु नृतयता।
नानाकरण संयुक्तैरङगहारैविभूषितम्।।[10]

इतोऽपि पाणिनिः अपि स्वग्रन्थं शिवशंकरस्य नृत्यकलात् एव प्रारम्भं करोति। वर्तमान समये अष्टाध्यायी व्याकरणशास्त्रस्य प्रमुखं ग्रन्थं वर्तते। पाणिनिः कथयति यत् व्याकरणस्याधारः माहेश्वर सूत्राणि एव सन्ति। तानि सूत्राणाम् आभिर्भावः शिवशंकरस्य ठक्कायाः माध्यमेन एव भवति। अनन्तरं नृत्यकलायाः विकासः अभवत्। भरतः कथयति यत् नृत्यस्योपयोगिता कस्यापि विशेषार्थस्य अभिव्यक्ते नास्ति परम् अस्योपयोगिता शोभादायक कारणात् नाट्ये अपेक्षितम् अस्ति। प्रायः सर्वान् जनानान् नृत्यं स्वभावत् प्रियं भवति। सर्वत्र शुभदायकम् अपि भवति। अतः एव नृत्यस्य अनिवार्यता नाट्ये भवति। भरतः कथयति यत् नृत्यं सर्वदा आनन्ददायकं भवति।

नाट्यशास्त्रे भरतः कथयति यत् –

किन्तु शोभां जनयतीत्यतो नृत्तमिदं स्मृतम्।[11]
प्रायेण सर्वलोकस्य नृत्तमिष्टं स्वभावतः।।

संगीतस्य शास्त्रीय परम्परायाः विकास भारते वैदिक कालात् एव भवति। प्रायः सामवेदस्य प्रयोगः संगीत क्षेत्रे कुर्वन्ति। परं संगीत कलायाः विकास भरतात् पूर्वमेव जातम्। येन प्रकारेण विविध वर्णानां विना चित्रस्य कल्पना न भवति तैनेव प्रकारेण नाट्यरागस्य सृजनं गीतं विना न भवति।

भरतः कथयति यत् नादेन विना गीतं न भवति। गीतं विना नृत्यं न भवति। वर्तमान समये संगीतस्य या रूपं प्रचलति। तस्याः आधार नाट्यशास्त्रमेव भवति। भरतस्य मतानुसारेण यस्तु तालं न जानाति सः न गाता न वादकः भवति।

काव्यकलायाः क्षेत्रे अपि वर्तमान समये नाट्यशास्त्रस्योपयोगिता भवति। यतोहि काव्यकलायाः नाट्यकलायाः च घनिष्ठ सम्बन्धं भवति। काव्यं नाटकस्य एव भेद भवति। काव्यकलायाः विकास संस्कष्त साहित्ये व्यवस्थित रूपं जातम्। सर्वप्रथम भामहः कथयति यत् शब्दार्थो सहितौ काव्यम्''। भर्तष्हरिः अपि कलायाः उपयोगितायां क्षेत्रे कथयति यत्–

''साहित्य संगीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः''

अर्थात् कलायाः अभावे मनुष्य, पशुवत भवति। भरतः मतानुसारेण नाटकस्य कृते चत्वारि तत्वानां अर्थात् काव्यं, गीतं, अभिनयं रसः चैव स्वीकारं करोति। तेषां मते –

पाठ्य एवं काव्यं भवति, गीतमेव संगीतं भवति, अभिनयमेव नृत्यं भवति।

भरतः नाट्यशास्त्रे अलकाराणां स्वरूपविषये अपि वर्णनं वर्तते। सप्तदशः अध्याये भरतः दोषाणां विषये अपि वर्णनं करोति। उक्तं च अतएव विपर्यस्ताः गुणाः काव्येषु कीर्तिताः[12]

वास्तुकलायाः क्षेत्रे अपि नाट्यशास्त्रस्योपयोगिता अस्ति। विश्वकर्माः वास्तुकलायाः प्रथमं देवता अस्ति। द्वितीयाध्याये भरतः प्रेक्षाग्रहे विषये वर्णनम् अस्ति। वयं पश्यामः यत् वास्तुकलया साकं मूर्तिकलायाः स्थापत्यकलायाः च विकामं अभवत्। परं वास्तुकलायाः स्थापत्यकलायाः च ह्रासं मुगलकाले अभवत्। अनन्तरं चित्रकलायाः मूर्तिकलायाः च विकासम् अभवत्।

अतः वयं स्पष्टरूपेण कथयितुं शक्नुमः यत् भरतेन प्रणीत नाट्यशास्त्र वर्तमान समये प्रचलित सर्वासां कलानां आधारग्रन्थम् अस्ति। अतः मानवस्य विकासाय नाट्यशास्त्रस्य वर्तमान सयये अतीव उपयोगितां वर्तते।

**(Footnotes)**

| | |
|---|---|
| 1 नाट्यशास्त्र–1.116 | 2 तैत्तिरियोपनिषद् |
| 3 नाट्यशास्त्र 6.31 | 4नाट्यशास्त्र 1.112 |
| 5 नाट्यशास्त्र 25.7 | 6 अभिनवभारती भाग।। पृ.130 |
| 7 नाट्यशास्त्र 25.123 | 8 दशरुपक 12.1 |
| 9 दशरुपक 13.1 | 10 नाट्यशास्त्र 4.13 |
| 11 नाट्यशास्त्र 4.261 | 12 नाट्यशास्त्र 17.95 |

**षष्टमपुटस्य शेषभागः** **संस्कृतवाङ्मये वर्णितस्य वनस्पत्यौषधिविज्ञानस्य.....**

वृक्षशरीरे शर्करा, मानवशरीरे अस्थि वृक्षशरीरे काष्ठानि उभयोः व्रणानि च पूरितानि भवन्ति।

अत उपर्युक्तविषयस्य विवेचनेन सिद्धयति। यथा मानवानां सर्वकारीयतन्त्रस्य महत्त्वपूर्णं प्रमुखं च कार्यं तद्वदेव अस्मभ्यं स्वस्थ्यजीवनप्रदानार्थं **वनानां वृक्षवनस्पत्यौषधीनाम्** अत्यन्तं लाभदायकमस्ति। इति शम्।

**सन्दर्भग्रन्थसूची**


| क्र. ग्रन्थनाम | व्याख्याता/सम्पादकः | प्रकाशनम् | वर्षम् |
|---|---|---|---|
| 1.**अथर्ववेदसंहिता** | पं.रामस्वरूपशर्मागौडः, | चौ.सं.प्र.38यू.ए.बं.रो.ज.न.दिल्ली | 1990 |
| 2.**अथर्ववेदसंहिता** | डॉ.धर्मेन्द्रकुमारः | दिल्ली संस्कृत अकादमी | 2013 |
| 3.**ऋग्वेदः** | पं.रामगोविन्दत्रिवेदी | चौखम्बाविद्याभवनम् वाराणसी | 1991 |
| 4.**ऐतरेयब्राह्मणम्** | सायणः | नागप्रकाशकः 11यू.ए.बंगलो रोड,जवाहर नगर,दिल्ली | 1991 |
| 5.**कठोपनिषद्** | गीताप्रेस गोरखपुर | 48संस्करण | 2012 |
| 6.**तैत्तिरीयसंहिता** | भट्टभाष्करमिश्रः | मोतीलाल बनारसीदास, देहली | 1986 |
| 7.**निरुक्तम्** | यास्काचार्यः | मेहरचन्दलक्ष्मणदास पब्लिकेशन नवदेहली, | 1999 |
| 8.**मनुस्मृति** | डॉ.राजेन्द्रनाथ शर्मा | परिमल पब्लिकेशन शक्तिनगर दिल्ली | 1992 |
| 9.**वैदिकवाङ्मयस्येतिहासः** | आचार्यजगदीशचन्द्रमिश्रः चौखम्बा | सुरभारती वाराणसी | 2009 |
| 10.**शतपथब्राह्मणम्** | पण्डितश्रीचन्द्रशर्मा, | अच्युतग्रन्थमाला कार्यालयः, वाराणसी | 1994 |
| 11.**शुक्लयजुर्वेदसंहिता** | पं.जगदीशलालशास्त्री, | मोतीलाल बनारसीदास, देहली | 1987 |
| 12.**श्रीमद्भगवद्गीता** | जयलालगोयन्दका, | गीताप्रेस, गोरखपुर वि.सं. | 1997 |
| 13.**वैदिककोशः** | हंसराज एवं भगवत्, | विश्वभारती अनुसन्धान परिषद् ज्ञानपुर वाराणसी, | 1992 |
| 14.**वैदिकपदानुक्रमकोशः** | विश्वबन्धुः | होशियारपुरम् विश्वेश्वरानन्दसंस्थानम् पंजाब विश्वविद्यालयः | 1959 |
| 15.**शब्दकल्पद्रुमः** | राजाराधाकान्तदेवः | राष्ट्रियसंस्कृतसंस्थानम् नवदेहली, | 1987 |


**(Footnotes)**

1 कठोपनिषदे 2/1/10 2 ऐ.ब्राह्मणे 2/4 3शुक्लयजुर्वेदे 29/34 4 शुक्लयजुर्वेदे 12/78 5 निरुक्ते 9/3/27–28 6 श.प.ब्राह्मणे 2/2/4/5 7 मनुस्मृतौ 1/46 8 मनुस्मृतौ 1/47 9 निरुक्ते 8/3/19 10ऋग्वेदे 3/8/1 11शुक्लयजुर्वेदे 17/1 12अथर्ववेदे 8/7/14 13कौटिल्याऽर्थशास्त्रे अधि.14/प्र.179 14सुश्रुसंहितायाम् 1/77 15 अथर्ववेदे 9/5/10 16 अथर्ववेदे 19/31/1 17 अथर्ववेदे 19/31/3 18 अथर्ववेदे 19/31/7 19 अथर्ववेदे 3/18/1 20 शुक्लयजुर्वेदे 16/18–19–20 21 शुक्लयजुर्वेदे 14/8 22 ऋग्वेदे 5/41/11 23 अथर्ववेदे 5/27/11 24 अथर्ववेदे 3/10/5 25 अथर्ववेदे 11/5/20 26 अथर्ववेदे 8/10/2–7 27 शुक्लयजुर्वेदे 12/77 28 शुक्लयजुर्वेदे 12/75 29 शुक्लयजुर्वेदे 12/89 30 बृहदारण्यकोपनिषदे 3/9/28

# वैंकेटेश्वर महाविद्यालये नुक्कड-नाट्य महोत्सवस्य आयोजनम्

-रित्विक अरोड़ा

दिल्ली। दिल्लीविश्वविद्यालयस्य दक्षिणीप्रभागेस्थित प्रतिष्ठित बैंकेटेश्वर महाविद्यालये नुक्कड-नाट्य महोत्सवस्य आयोजनमभवत्। महाविद्यालयेस्थित नाट्य संस्था ''अनुभूति'' माध्येमन





आयोजित अस्मिन् समारोहे बहु महाविद्यालयाः भागं गृहीतवन्तः। समारोहस्य मुख्यातिथि प्रख्यात चलचित्र एवं नाट्य अभिनेत्री शिल्पी मारवाह आसीत्। शिल्पी मारवाह नाट्य प्रतियोगितायां निर्णायकस्य भूमिका अपि कृतवती। ''अनुभूति'' नाट्य संस्था प्रतिवर्ष एतादृशस्य कार्यक्रमस्य आयोजनं करोति। विभिन्न महाविद्यालयानां छात्र-छात्रा अस्याः संस्थायाः अन्तर्गत विभिन्न सामाजिक तथ्य यथा-बलात्कार, मानसिकरोग, ट्रासजेण्डर, अधिकार विषयस्योपरि आधारित नुक्कड़ नाटकस्य आयोजनम् अकरोत्। सोसाइटी माध्यमेन प्रथम पुरस्कार शहीदभगतसिंह महाविद्यालय (सांय), द्वितीय पुरस्कार-कॉलेज आफ वोकेशनल स्टडीज एवं तृतीय पुरस्कार लेडीश्रीराममहाविद्यालय प्रदत्तम्।




संस्कृत विभाग डॉ.हरिसिंहगौर वि.वि.सागरे आयोजित अन्ताराष्ट्रिय शोधसंगोष्ठ्या उद्घाटन सत्रे संस्कृतमनीषिणां करकमलेन मया एवं डॉ. रामरतनपाण्डेन द्वारा विरचित पुस्तक ग्रन्थ रत्नस्य विमोचनमभवत्

# संस्कृतमयं वातावरणं कर्तुं समाजिकाः अग्रेसराः भवन्तु- उपाध्यक्षः संस्कृतभारती

वार्ताहरा सोनिया पर्णप्रस्थम् (पानीपत)हरियाणा। चैत्र कृष्णचतुर्दशी संवत् 2074 शुक्रवासरे (16/03/2018) पर्णवत्तनस्थ सनातनधर्म महाविद्यालयस्य तत्वावधाने प्रांगणे च संसस्कृतभारती हरियाणा स्स्कृत सम्मेलनम् आयोजितवती। कार्यक्रमेस्मिन् डॉ सुरेन्द्र मोहन मिश्रः अध्यक्षः संस्कृतभारती,




हरियाणा, डॉ श्रेयांश द्विवेदी उपाध्यक्षः हरियाणा संस्कृत अकादमी पञ्चकूला एवं प्रान्त उपाध्यक्षः संस्कृतभारती हरियाणा, प्रो वीरेन्द्र सिंह चौहान उपाध्यक्षः हरियाणा ग्रन्थ अकादमी, प्रो राधेश्याम शर्मा पूर्वकुलपतिः, आचार्य महावीर जी करनालतः, डॉ बालकृष्ण जी, डॉ अनुपम अरोड़ा जी,प्राचार्यः सनातनधर्म महाविद्यालयः पर्णप्रस्थम्,

श्रीमान् दिनेश गोयल जी प्रधान सनातनधर्म शिक्षणसंस्था, पर्णप्रस्थम्, श्री हरिदेव शास्त्री, प्रान्त कोषप्रमुखः संस्कृतभारती हरियाणा, डॉ सुश्रुत सामश्रमी सम्मेलनस्य संयोजकः सञ्चालकश्च। श्रीमती सोनिया वर्ना जी, श्री पवन शर्मा जी, श्रीमती अञ्जु शर्मा, श्री गुरमुख सिंह बड़ैच, आर्या सुषमा जी, श्री कंवर भान जी, डॉ दिनेश सिंहल जी, डॉ मनीष शर्मा जी, श्री अनूप वर्मा, संजय शास्त्री प्रभृतयः विद्वांसः उद्योगिनः सामाजिकाश्च समुपस्थिताः आसन्। अवसरेस्मिन् संस्कृतस्य वैभवं डॉ सुरेन्द्र मोहन मिश्रः प्रमुख रूपेण उपस्थापितवन्तः। प्रो वीरेन्द्र चौहान उपाध्यक्षः हरियाणा ग्रन्थ अकादमी संस्कृतं जनभाषा भवेदिति विषये संस्कृतग्रामाणां चर्चां कृतवन्तः। तेनोक्तं डॉ श्रेयांश द्विवेदी सततं संस्कृतमयं वातावरणं कर्तुं प्रयतन्ते। डॉ द्विवेदिनः प्रयासेन हरियाणा राज्ये शास्त्री आचार्यकक्षयोः मान्यता सञ्जाता अथ च महर्षि वाल्मीकि संस्कृत विश्वविद्यालय मुद्रिका कैथल अधिनियम 2018 हरियाणा सर्वकारपक्षतः विधानसभायां अधिनियमः प्रस्तुतः स्वीकृतश्च। प्रो चौहान हरियाणा सर्वकारस्य यशस्विनः मुख्यमन्त्रिणः कार्यशैल्याः प्रशंसाकृता। डॉ श्रेयांश द्विवेदी महोदयेन प्रोक्तं परमहर्षस्य विषयो यत् संस्कृतभारती समग्रे राज्ये संस्कृत सम्मेलनानि आयोजयति। हरियाणा राज्यस्य मुख्या भाषा आसीत् अस्ति स्थास्यति च। अहं निवेदयामि यत् अस्माकं सहयोगेन संस्कृतभारती समग्रं हरियाणाराज्यं संस्कारयुतं संस्कृतमयं च कर्तुं शक्नोति। मम विश्वासः अस्ति यत् संस्कृतज्ञानं विना न कोह्यपि भारतीयः भवितुमर्हति। अतः यावत् पर्यन्तम् अस्माकं संस्कृतं प्रति अनुरागः न भविष्यति तावत् पर्यन्तं राष्टभक्तिः कथम्। सर्वे जनाः यदि राष्टभक्ताः भविष्यन्ति तर्हि राष्टं वैभवसम्पन्नं भविष्यति। समृद्धं सुसंस्कृत सुशीलं च राष्टं भविष्यति।संस्कृतभारती यूनां समाह्वानं करोति यत् ते आत्मनः न्यूनातिन्यूनम् प्रतिसप्ताहम् एकहोरात्मकं कालः संस्कृतभारत्यै यच्छन्तु। मञ्चसञ्चालनं डॉ सुश्रुत सामश्रमी महोदयः कृतवान्। अवसरेस्मिन् श्रीमान् दिनेश गोयल जी प्रधान सनातनधर्म शिक्षणसंस्था संस्कृतसम्भाषणकेन्द्रस्य स्थापनार्थं सङ्कल्पं कृतवान्। एतद्विषयिणी घोषणा डॉ अनुपम अरोड़ा प्राचार्य महोदयेन मञ्चात् कृता। अन्ते च कल्याणमन्त्रेण सम्मेलनम् सम्पन्नम्।

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।**

**वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**
**IFC Code- IOBA0002249**

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, शुभम् आर्य, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।